Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO. NEW 3217 OLD 196

FOLIO 080

TITLE

1. अवयवचिन्तामणिव्याख्या
2. तर्कभाषा
3. चिन्तामणि अनुमानखण्डः

तर्कभाषा

केशवमिश्र

त॰भा॰ ॥ ॥श्रीगणेशाय नमः॥ बालोपि यो न्यायनये प्रवेशमल्पेन वांछत्यलसः श्रुतेन संक्षिप्तयुक्त्यन्वितर्कभाषा प्रकाश्यते त

प्र१

१ स्य कृते मयैषा॥१॥ प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछ

लजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इति न्यायस्यादिमं सूत्रं। अस्यार्थः। प्रमाणादिषोडशपदार्थानां

तत्वज्ञानान्मोक्षप्राप्तिर्भवतीति न च प्रमाणादीनां तत्वज्ञाने सम्यक् [illegible]ंतं भवति। यावदेतेषामुद्देशलक्षणप

रीक्षा न क्रियंते। यदाह भाष्यकारः। त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः। उद्देशो लक्षणं परीक्षा चेति। उद्देशस्तु नाम

मात्रेण वस्तुसंकीर्तनं। तच्चास्मिन्नेव सूत्रे कृतं। लक्षणं त्वसाधारणधर्मवचनं। यथा गोः सास्नादिमत्वं। लक्षितस्य लक्ष

णमुपपद्यते न वेति विचारः परीक्षा। तेनैकैकस्य परीक्षा प्रमाणादीनां तत्वज्ञानार्थं कर्तव्या। तत्रापि प्रथममुद्दिष्टस्य प्र

माणस्य तावल्लक्षणमुच्यते। प्रमाकरणं प्रमाणं। अत्र प्रमाणं लक्ष्यं प्रमाकरणत्वं लक्षणं। ननु प्रमायाः करणं

अवश्यं२

त्वप्रमाणांतर्हितः ... कार्ये। करणस्य फलवत्त्वनियमात्। सत्यं। एवं ... लं। साध्यमित्यर्थः। यथा छिदिकरणस्य पर
शोः छिदैव फलं। का पुनः प्रमा। यस्याः करणं प्रमाणमुच्यते। यथार्थानुभवः प्रमा। यथार्थ इत्ययथार्थानां संशयविपर्य
यतर्कज्ञानानां निरासः। अनुभव ... इति स्मृतेर्निरासः। अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानं संस्कारमात्रजं ज्ञानं स्मृ
तिः। किं पुनः करणं। साधकतमं करणं। अतिशयितं साधकं साधकतमं प्रकृष्टं कारणमित्यर्थः। ननु साधकं करणमि
ति पर्यायः। तदेव न ज्ञायते किं तत्कारणमिति। उच्यते। यस्य कार्यात्पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणं। यथा
तंतुवेमादिकं पटस्य कारणं। यद्यपि पटोत्पत्तौ रासभादेर्दैवादागतस्य पूर्वभावो विद्यते तथापि नासौ नियतः। तंतुरूप
स्य नियतः पूर्वभावोस्त्येव। किंत्वन्यथासिद्धः पटरूपजनने उपक्षीणत्वात्। परं प्रत्ययिकारणत्वे कल्पनागौरवात्। क
ल्पनागौरवं यत्र तं पक्षं न सहामहे। कल्पनालाघवं यत्र तं पक्षं रोचयामहे। तेनानन्यथासिद्धनियतपूर्वभावित्वं कारण

अनन्यथासिद्धनियतपश्चाद्भावित्वं कार्यत्वं। यत्कश्चिदाह। कार्यानुकूलान्वयव्यतिरेकि कारणमिति। तदयुक्तं। नित्य
विभूनां व्योमादीनां कालतो देशतश्च व्यतिरेकासंभवेनाकारणत्वप्रसंगात्। तच्च कारणं त्रिविधं। समवाय्यसमवायिनिमि
त्तभेदात्। तत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं। यथा तंतवः पटस्य समवायिकारणं। तंतुष्वेव हि पटः सम
वेतो जायते। न तु तुर्यादिष्विति। ननु संबंधस्तु तुर्यादिसंबंधोपि पटस्य विद्यते। तत्कथं तंतुष्वेव हि पटः समवेतो जायते। न
तुर्यादिषु। सत्यं। द्विविधः संबंधः। संयोगः समवायश्चेति। तत्रायुतसिद्धयोः संबंधः समवायः। अन्ययोस्तु संयोग एव।
अयुतसिद्धौ। ययोर्द्वयोर्मध्ये एकं अविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। तदुक्तं। तावेवायुतसिद्धौ द्वौ
विज्ञातव्यौ ययोर्द्वयोः। अनश्यदेकमपराश्रितमेवावतिष्ठते ॥१॥ यथावयवावयविनौ। गुणगुणिनौ क्रियाक्रियावंतौ रा
जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अवयव्यादयो हि अवयवाद्याश्रिता एवावतिष्ठंते यथा कथं अपि नश्यंतः। विनश्यद २

नाशा नाशा

तस्यास्तन्नाश्रिताएवावतिष्ठंते। यथा तंतुनाशे सति पटः। यथा वा आश्रयनाशे सति गुणाः। विनश्यत्त्वात्तु विना
शकारणसामग्रीसान्निध्यं। तंतुपटावपि अवयवावयविनौ। तेन कारणेन तयोः संबंधः समवाय एव। अयुतसिद्ध
त्वात्। तुरीपटयोः कथं न समवायः। अयुतसिद्धभावात्। अयुतसिद्धत्वाभावस्तु द्वयोः पृथग॰स्थानात्। नहि तुरीप
टाश्रितेनावतिष्ठते। नापि पटः तुर्याश्रितः। अनयोः संबंधः संयोग एव। एवं परमा[illegible]। :पटयोः दंडपुरुषादी
च नां संयोग एव। तदेवं तंतुसमवेतः पटः। यत्र समवेतं कार्यं उत्पद्यते तत् समवायिकारणं। अतस्तंतुरेव पटस्य समवायि
कारणं। ननु याहि। पटश्च स्वगतरूपादेः समवायिकारणं। एवं मृत्पिंडोपि घटस्य समवायिकारणं। घटश्च स्वगत
रूपादीनां समवायिकारणं। ननु पटो वद्वटादयो जायंते तदैव तद्गतरूपादयोपि जायंते। अतः समानकालीनत्वा
३ द्गुणगुणिनोः सव्येतरविषाणवत्। कार्यकारणभाव एव नास्ति पौर्वापर्याभावात्। अतएव रूपादी[illegible]वा।

त्स समवेता गुणा उत्पद्यंते समानकालोत्पन्नयोरुभयोर्गुणगुणिनोः २

रु॰भा॰ पिकारणत्वं घटादीनां। कारणविशेषत्वात्समवायिकारणस्य। अत्रोच्यते न गुणगुणिनोः समानका[illegible]। किंतु द्रव्यं
२ निर्गुणमेव प्रथममुत्पद्यते। पश्चात्तन्निष्ठाः समानसामग्रीकत्वादेकेन स्यात् भिन्नसामग्र्या अप्यजात्यवच्छिन्नत्व भियोगि
[illegible]देहेन स्यात्। कारणभेदनियतत्वात्कार्यभेदस्य। तस्मात्प्रथमे क्षणे निर्गुण एव घटो गुणोत्पत्तेः पूर्वं नाविभवति।
द्रव्यं गुणानां समवायिकारणं तत्कारणभेदोपपत्तिः। घटो हि घटं प्रति न कारणं। एकस्यैव पौर्वापर्याभावात्। न हि स एव तस्मै
भव वे प्रति पूर्वभावि पश्चाद्भावी चेति। स्वगुणान् प्रति पूर्वभावित्वाद्भवति गुणानां कारणं। नन्वेवं सति प्रथमे [illegible]णे घटोऽचाक्षुष
ः स्यात्। अरूपिद्रव्यत्वात् वायुवत्। तस्य हि रूपं वा चाक्षुषप्रत्यक्षे महत्त्वे सत्युद्भूतरूपवत्। अद्रव्यं च स्यात्। गुणाश्रयत्वा
भावात्। गुणाश्रयो हि भिन्नं द्रव्यस्य लक्षणं। सत्यं। प्रथमे क्षणे परमेश्वरेच्छातो घटोऽपि चक्षुषा न गृह्यते न एका रा॰
नेहा निर्गुणो हि सगुणो संनिपत्ये पिनिमेषाद्यवसरे घटस्य [illegible] गृह्यते तेन व्यवस्थितमेतत् निर्गुण एव घटः प्रथममुत्प २

गुणान्तं तापकवाध्या नधिकरणं योग्यता २

घते। द्वितीयादिसूत्रौ वहुषाद्वयोरुच्यते। न च प्रथमे सूत्रे ण्यादुच्यत्वापत्तिः। असमवायिकारणं द्व्यणुकमिति द्व्यणुकलक्षणायोगा
गात्। योऽयं पयगुणः परमाण्वौ असमवायिकारणं तदुच्यते। यत्समवायिकारणप्रत्यासत्त्या अवधृतसामर्थ्यं तद
समवायिकारणं। यथा तन्तुद्वयसंयोगः पटस्यासमवायिकारणं। एवं तन्तुसंयोगस्य गुणस्य पटसमवायिकारणेषु
तन्तुषु गुणिषु समवेतत्वेन समवायिकारणप्रत्यासत्त्या। अत्र यथाश्रुतनिपातपूर्वभाविलेन परं प्रतिकार
रूपगतरूप णत्वाच्च। एवं तन्तुरूपं पटस्यासमवायिकारणं। ननु पररूपस्य परः समवायिकारणं। तेन तद्वृत्तस्यैकस्य चिह्नस्य पर
रूपं प्रति असमवायिकारणत्वमुचितं। तस्यैव समवायिकारणप्रत्यासन्नत्वात्। ननु तन्तुरूपस्य। तस्य समवायिका
रणप्रत्यासन्नताभावात्। मैवं। समवायिकारणसमवायिकारणप्रत्यासन्नत्वापि तन्तुरूपस्य परं पररूपसमवायिका
रणप्रत्यासन्नत्वात्। निमित्तकारणं तदुच्यते। यत्र असमवायिकारणं नाप्यसमवायिकारणं अथ च कारणं तन्निमित्तकार

उरी रूपा त्रि मि व्याते प्रमाण

त.भा. णं। यथा वेमादिकं पटस्य निमित्तकारणं। तदेतज्ञाव नामेव [illegible] विधं कारणं भावस्यैव। अभावस्य तु निमित्तमात्रं तस्य क्वाप्य
४ समवायात्। समवायस्य भावद्वयधर्मत्वात्। तदे[illegible] विधस्य कारणस्य मध्ये यदेव कथमपि सातिशयं तदेव क
रणं। तेन सुव्यवस्थितमेतल्लक्षणं प्रमाकरणं प्रमाणमिति। यत्त्वनधि[illegible]गतार्थगन्तृ प्रमाणमिति तल्लक्षणं तन्न। एकस्मिन्ने प्र२
व हि घटे घटोऽयं घटोऽयमिति धारावाहिकज्ञानानां गृहीतग्राहिणामप्रा[illegible]माण्यप्रसङ्गात्। न चान्यान्यक्षणकलाविशि
व ष्टविषयीकरणादनधिगतार्थगन्तृता। प्रत्यक्षेण सूक्ष्मकालभेदानाकलनात्। नेह ग्रहे हि क्रियादिसंयोगानां च
प्र तुर्णां योगपद्याभिमानो न स्यात्। ननु संनिपाताः [illegible] हूतिसे तिप्रमातृप्रमेयादीनि तान्यपि किं करणानि नि
उत नेति उच्यते। सत्स्वपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः। इन्द्रियसंयोगे सत्यविलम्बेन प्रमोत्पत्तेः। अतः इन्द्रिय एम०
संयोगादिरेव करणं। साधकत्वाविशेष[illegible]नोत्कर्षेणास्य प्रमाजनकादिभ्योऽतिशयितत्वात्। अतिशयितं साधकं सा ४

का नप्रमानादिः

धकतमं तत्करणमिति युक्तमेव अत इंद्रिय [ ]णो ग्राहित्वं प्रमाकरणत्वात्प्रमाणं न प्रमाणान्तराणि च प्रमा[ ]॥ नि च

त्वार्येव । तथा च न्यायसूत्रं । प्रत्यक्षानुमानोपमानश[ ]माणानीति । किंपुनः प्रत्यक्षं । साक्षात्कारि[ ]माकरणं

प्रत्यक्षं । साक्षात्कारिणी[ ]मा सैवोच्यते येंद्रियजा । सा च द्विविधा सविकल्पकनिर्विकल्पकभेदात् । तस्याः करणं त्रि

विधं । कदाचिदिंद्रियं कदाचिदिंद्रियार्थसन्निकर्षः करणं कदाचिज्ज्ञानं । कदा पुनरिंद्रियं करणं । यदा निर्विकल्पकरू

पप्रमा फलं । तथा हि । आत्मा मनसा संयुज्यते मन इं[ ]ण इंद्रियमर्थेन । [ ]द्रियाणां प्राप्यकारित्वनियमात् । अतो वस्तु

र्थसन्निकृष्टेनेंद्रियेण निर्विकल्पकं नाम जात्यादियोजनाहीनं व[…]मात्रावगाहि किंचिदिदमिति ज्ञानं जन्यते । तस्य ज्ञान सकृत्वेन

स्येंद्रियं करणं । छिदायामिव परशुः । इंद्रियार्थसन्निकर्षोऽवान्तरव्यापारः । तज्जन्यत्वे सति तज्जन्यजनको वान्तरव्यापा

रः । छिदाकरणस्य परशोरिव दारुसंयोगः । निर्विकल्पकं ज्ञानं फलं । परशोरिव छिदा । कदा पुनरिंद्रियार्थसन्निकर्षः क

भा० रणं । यदा निर्विकल्पकज्ञानं [illegible] सविकल्प[illegible] नामजात्या[illegible]दियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति वि[illegible] विशे
५ ष्यावगाहि ज्ञानमुत्पद्यते । तदेंद्रियार्थसंनिक[illegible]रणं निर्विकल्पकज्ञानमवांतरव्यापारः सविकल्पकज्ञानं फलं । क
दा पुनर्ज्ञानं करणं । यदाऽत्र सविकल्पकज्ञानंतरं हानोपादानोपेक्षाबुद्धयो जायंते तदा निर्विकल्पकं ज्ञानं करणं सवि
कल्पकमवांतरव्यापारः । हानादिबुद्धयः फलं । अत्र कश्चिद्दूषमाह सविकल्पकादीनामींद्रियमेव करणं यावंति म
स्योंतरालिकानि संनिकर्षादीनि तानि सर्वाण्यवांतरव्यापाराः स्युः । इंद्रियार्थयोस्तु यः संनिकर्षः साक्षात्कारि प्रमा यः
हेतुस्स षड्विधः एव । तद्यथा । संयोगः संयुक्तसमवायः । संयुक्तसमवेतसमवायः । समवायः । समवेतसमवायः ।
विशेषणविशेष्यभावश्चेति । तत्र यदा चक्षुषा घटविषयं ज्ञानं जन्यते । तदा चक्षुरिंद्रियं घटोऽर्थः । अनयोस्तु सन्नि रामं
कर्षः संयोग एव । अयुतसि[illegible]भावात् । एवं मनसांतरिंद्रियेणात्मविषयं ज्ञानं जन्यते । अहमिति । तदा मनइं ५

६

इंद्रियं ज्ञाह्यार्थः। अनयोः संनिकर्षः संयोगस्वा कदा पुनः संयुक्तसमवायः संनिकर्षः। यदा चक्षुषा घटगतरू
पादिकं गृह्यते घटेऽस्य रूपमस्तीति। तदा चक्षुरिंद्रियं घटगतरूपादिकमर्थः। अनयोः संनिकर्षः संयुक्तसमवा
य एव। चक्षुःसंयुक्ते घटे रूपस्य समवायात्। एवं मनसा आत्मसमवेतसुखादेर्ग्रहणे अयमेव संनिकर्षः। द्वि
दणुकपरिमाणाग्रहणे चतुष्टयः संनिक[illegible]धिकं कारणमिष्यते। तत्रापि संयुक्तसमवायेन द्व्यणुके महावद्व
रेयपरिमाणाग्रहणात्। चतुष्टयसंनिकर्षो यथा। इंद्रियावयवैरर्थावयवानां इंद्रियावयवविनाऽवयविनः। इं
द्रियावयवैरर्थावयविनः। अर्थावयवानां इंद्रियावयविना संयोग इति। कदा पुनः संयुक्तसमवेतसमवायः संनिक
र्षः। यदा पुनश्चक्षुषा घटगतरूपादिसमवेतरूपत्वादि[illegible]मत्तानेन ज्ञायते तदा चक्षुरिंद्रियं रूपत्वादिसा
मान्यमर्थः। अनयोः संनिकर्षः संयुक्तसमवेतसमवाय एव। यतश्चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्व[illegible] स्य

मनः संयुक्ते
आत्मनि सु
खादेः समवायः
[illegible]
अर्था

संनिकर्षः समवा०।
श्रोत्रसमवेते शब्दे श

•भा• ।इसमवायात् कुतः पुनः समवायलक्षणः संनिकर्षः। यदा श्रोत्रेंद्रियेण शब्दो गृह्यते। तदा श्रोत्रमिंद्रियं शब्दोर्थः। अ ब्देत्वस्य सम

६ नयोः संनिकर्षः समवाय एव अयुतसिद्धेः। श्रोत्रस्याकाशात्मकत्वात्। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रं शब्दस्य वायात् कदा।

चाकाशगुणत्वात् गुणगुणिनोः समवायात्। कदा पुनः समवेतसमवायः संनिकर्षः। यदा शब्दसमवेतश पुनर्विशेषण

ब्दत्वादिसामान्यं श्रोत्रेंद्रियेण गृह्यते। तदा श्रोत्रमिंद्रियं शब्दत्वादिसामान्यमर्थः। अनयोः संयुक्ते भूतले घ विशेष्यभाव

टाभावो गृह्यते। इह भूतले घटो नास्तीति। तदा चक्षुः संयुक्तस्य भूतलस्य घटाभावो विशेष्यं भूतलं विशेषणं। इंद्रियार्थसंनि

^ यदा मनः संयुक्ते आत्मनि सुखाद्यभावो गृह्यते। अहं सुखरहित इति। तदा मनः संयुक्तस्यात्मनः सुखाद्यभा कर्षः यदा चक्षुः

वो विशेषणं आत्मा विशेष्यं। यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते तदा श्रोत्रसमवेतस्य गकारस्य घ स्यत्र

त्वाभावो विशेष्यं गकारो विशेषणं। तदेवं संक्षेपतः पंचविधसंबंधान्यतमसंबंधे विशेषणविशेष्य राम०

घटाभाववद्भूतलमित्यत्र चक्षुः संयुक्तस्य भूतलस्य घटाभावो विशेषणं ३॥ मयि सुखं नास्तीति तदा ६

मनः संयुक्तस्यात्मनः सुखाभावो विशेष्यं २

भावलक्षणेनेंद्रियार्थसंनिकर्षेणाभाव इंद्रियेण गृह्यते ।एवं समवायोपि। चक्षुःसंबंधस्य तंतो विशेषणस्य वि ७१
शेष्यीभूतः पटस्य समवायो गृह्यते । इह तंतुषु पटसमवाय इति ।तदेवं षोढा ॰न्निकर्षो वर्णितः ।संग्रहश्च।
अक्षजा प्रमितिर्द्वेधा सविकल्पाविकल्पिका।करणं त्रिविधं तस्याः संनिकर्षस्तु षड्विधः। घटतत्री ल्नत
ल्नत्वशब्दशब्दत्वजातयः। अभाव समवायौ च ग्राह्याः संबंधषट्कतः [illegible]ते। ननु विर्विकल्पं परमार्थसत्स्वल ल्यकं
क्षणविषयं भवतु प्रत्यक्षं। सविकल्पके तु शब्दलिंगवदनुगताकारावगाहित्वात् सामान्यविषयं कथं प्र
माणं अर्थजस्यैव प्रत्यक्षत्वात्। अर्थस्य च परमार्थसत एव जनकत्वात्। स्वलक्षणं तु परमार्थसत्। न तु सा
मान्यं। तस्य प्रमाणनिरस्तविधिभावस्य आहत्याजनकत्वात्। मैवं। सामान्यस्यापि वस्तुभूतत्वात्। त पि
देवं व्याख्यातं प्रत्यक्षं।। लिंगपरामर्शोऽनुमानं। येन ह्यनुमीयते तदनुमानं। लिंगपरामर्शेन चानुमीयते।
त

अतो लिंगपरामर्शोनुमानं। तच्च ... दिज्ञानं। अनुमितिं प्रति करणत्वात्। अग्न्यादिज्ञानमनुमिति
:। तत्करणं हि धूमादिज्ञानं। किंपुनर्लिंगं। कश्च तस्य परामर्शः। उच्यते। व्याप्तिबलेनार्थगमकं
लिंगं। यथा धूमोग्नेर्लिंगं। तथाहि। यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः। गृहीतस्यैता
यामेव धूमोग्निं गमयति। अतो व्याप्तिबलेनाग्न्यनुमापकत्वाद्धूमोग्नेर्लिंगं। तस्य तृतीयज्ञानं लिंगपरा
मर्शः। तथाहि। प्रथमं तावत् महानसादौ भूयो भूयो धूमं पश्यन्नेव वह्निं पश्यति। तेन भूयो दर्शनेन धूमा
ग्न्योः स्वाभाविकं संबंधमवधारयति। यत्र धूमस्तत्राग्निरिति। यद्यपि यत्र यत्र मैत्रीतनयत्वं तत्र तत्र
श्यामत्वमपि भूयो दृष्टं समाने। तथापि ... मैत्रीतनयत्वे ... तत्र श्यामत्व[illegible]यो न स्वाभाविकः संबंधः।
किंत्वौपाधिक एव। ... शाकाद्याहारपरिणामस्योपाधेर्विद्यमानत्वात्। तथाहि। किंतु शाकाद्यन्नपरिणामभेद एव

३।६२ नो

श्यामत्वे मैत्रीतनयत्वं न तत्र मोजकं १

प्रयोजकः। प्रयोजकश्चोपाधिरित्युक्तं। न च धूमाग्न्योः संबंधे कश्चिदुपाधिरस्ति। अस्ति चेद्योग्यो
योऽयोग्यो वा। अयोग्यस्य शंकितुमशक्यत्वात्। योग्यस्य चानुपलभ्यमानत्वात्। यत्रोपाधिरस्ति तत्रोपलभ्य
उपाधिः३ ते। यथाग्नेर्धूमसंबंधे आर्द्रेंधनसंयोगः। हिंसात्वस्य वाधर्मसाधकत्वेन सह संबंधे निषिद्धत्वमुपाधि न
च४ ः। मैत्रीतनयत्वस्य श्यामत्वेन संबंधे शाकाद्यन्नपरिणतिभेदः। न च धूमाग्न्योः साहचर्ये कश्चिदुपाधिर
स्ति। यद्यभविष्यत् तदाद्रक्ष्यत। ततो दर्शनाभावान्नास्तीति तर्कसहकारिणानुपलंभसनाथेन प्रत्यक्षेणै
वोपाध्यभावोवधार्यते। तथा च उपाध्यभावग्रहणजनितसंस्कारसहकृतेन भूयोदर्शनजनितसंस्का
रसहकृतेन साहचर्यग्राहिणा प्रत्यक्षेणैव धूमाग्न्योर्व्याप्तिरवधार्यते। तेन धूमाग्न्योः स्वाभाविक एव संबं
धः न त्वौपाधिकः। स्वाभाविकसंबंधो व्याप्तिरुच्यते। तदनेन न्यायेन धूमाग्न्योर्व्याप्तौ गृह्यमाणायां महानसे

त॰भा॰ यद्धूमज्ञानं तत्प्रथमं पर्वतादावुपजायते ; मज्ञानं तद्वितीयं । ततः पूर्वगृहीतां धूमाग्न्योर्व्याप्तिं स्मृत्वा तत्रैव पर्वते पुनर्धूमं
८ परामृशति । अस्त्यत्र पर्वतेऽग्निना व्याप्तो धूम इति । तदिदं धूमज्ञानं तृतीयं । तच्चावश्यमभ्युपेयं । अन्यथा यत्र धू
मस्तत्राग्निरित्येवं स्यात् । इह तु कथमग्निना भवितव्यं । तस्मादिहापि धूमोऽस्तीति ज्ञानमन्वेष्टव्यं । अयमेव लिं
प्रति४ गपरामर्शः । अनुमितिकरणत्वाच्चानुमानं । तस्मादस्त्यत्र पर्वतेऽग्निरिति अनुमितिज्ञानं कथैमुत्पद्यते ।
ननु कथं प्रथमं महानसे यद्धूमज्ञानं तत्कथं नाग्न्यनुमापकं । सत्यं । व्याप्तेरगृहीतत्वात् गृहीतायामेव व्याप्तौ व
नुमित्युत्पादात् । अथ व्याप्तिनिश्चयोत्तरकालं महानस एवाग्निरनुमीयतामेवं । अग्नेर्दृष्टत्वेन संदेहाभावा
त् । संदिग्धश्चार्थोऽनुमीयते । तथोक्तं भाष्यकृता । नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्तते । अपि तु संदिग्धे राम॰
राम ऽर्थे । ननु पर्वतगतमज्ञस्य पुंसो यद्धूमज्ञानं तत्कथं नाग्निमनुमापयति । अस्ति चात्राग्निसंदेहः साधकबाधक ८

प्रमाणाभावेन संदेहस्य [illegible] सत्वात् । सत्वे च गृहीतव्याप्तेरिवागृहीत । व्यस्मृतव्याप्तेरपि [illegible] सोऽनुमानानुदयेन
व्याप्तिस्मृतेरप्यनुमितिहेतुत्वात् । धूमदर्शनादुद्बुद्धसंस्कारो व्याप्तिं स्मरति । यो यो धूमवान् स सोऽग्निमानू यथा ५२
न महानस इति । तेन धूमदर्शने जाते व्याप्तिस्मृतौ जातायां यद्धूमवत्ताज्ञानं तत्तृतीयं । धूमव [illegible] मिति । तदेवाग्नि
मनुमापयति नान्यत् । तदेव लिंगपरामर्शः । तेन व्यवस्थितमेतल्लक्षणं । लिंगपरामर्शोऽनुमानमिति । तच्चा
नुमानं द्विविधं । स्वार्थं परार्थं चेति । स्वार्थं स्वप्रतिपत्तिहेतुः । तथा हि । स्वयमेव महानसादौ विशिष्टेन प्रत्यक्षेण
धूमाग्न्योर्व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वतवर्त्तिनीमविच्छिन्नमूलामभ्रंलिहां धूम
लेखां पश्यन् धूमदर्शनादुद्बुद्धसंस्कारो व्याप्तिं स्मरति । यत्र धूमस्तत्राग्निरिति । ततो व्याप्यधूमोस्तीति स्वयमे
व प्रतिपद्यते । तस्मात्पर्वतेऽग्निरित्यनुमितिज्ञानमुत्पद्यते । तत्स्वार्थानुमानं । यत्तु स्वयं धूमादग्निमनु

त॰ भा॰ ९ ज्ञापपरं वोधयितुं पंचावयववाक्यमनुमानवाक्यं प्रयुंक्ते तत्परार्थानुमानं तथोदे। पर्वतोऽग्निमान् धूमवत्त्वात्। यो
यो धूमवान् सोऽग्निमान् यथा महानसः। तथा चायं धूमवान् तस्मात्तथेति। अनेन हि वाक्येन प्रतिपादितात्स्व
रूपोपपन्नात् परोऽप्यग्निं प्रतिपद्यते। तेनैतत्परार्थानुमानं। अत्र च पर्वतस्यामत्वं साध्यो धूमवत्वं हेतुः। स
चान्वयव्यतिरेकी। अन्वयेन व्यतिरेकेण च व्याप्तेः संभवात्। तथाहि। यत्र धूमस्तत्राग्निर्यथा महानस इति
अन्वयव्याप्तिः। महानसे धूमाग्न्योरन्वयस्य सद्भावदर्शनात्। एवं यत्राग्निर्नास्ति तत्र धूमोऽपि नास्ति यथा म
हाह्रद इति व्यतिरेकव्याप्तिः। महाह्रदे धूमाग्न्यो व्यतिरेकसद्भावदर्शनात्। व्यतिरेकव्याप्तेरयं क्रमः। अन्व
यव्याप्तौ यद्व्याप्यं तदभावो व्यापकः। अन्वयव्याप्तेर्व्यापकं तदभावो व्याप्य इति। तदुक्तं व्याप्यव्या राम॰
पकभावो हि भावयोर्यादृगिष्यते। तयोरभावयोस्तस्माद्विपरीतः प्रतीयते॥ १॥ —स्य वचनं पूर्वं ९

स्वा

व्याप्यस्य ततः परं। एवं परीक्षिता व्याप्तिः स्फुटीभवतीति तत्त्वं॥ २॥ अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते। सा
ध्याभावो न्यथा व्याप्यो व्यापकः साधनात्ययः॥ ३॥ तदेवं धूमवत्त्वे हेतावन्वयेन व्यतिरेकेण च व्याप्तिरस्ति। प
ञ्चवाक्ये केवलमन्वयव्याप्तिरेव प्रदर्शिता। तदेकेनापि चरितार्थत्वात्। तत्राप्यन्वयस्यावक्रत्वात् प्रथमं प्रदर्शि
ता। ऋजुमार्गेण सिद्धतोर्थस्य वक्रेण साधनायोगात्। न तु व्यतिरेकव्याप्तेरभावात्। तदेवं धूमवत्त्वे हेतुरन्वय
व्यतिरेकी। एवमन्येपि नित्यत्वादौ साध्ये कृतकत्वादयो हेतवोन्वयव्यतिरेकिणो द्रष्टव्याः। कश्चिद्धेतुः केव
त३ लव्यतिरेकी। यथा सात्मकत्वे साध्ये प्राणादिमत्त्वं हेतुः। तथा हि। जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्। यत्सात्म
कं न भवति तन्न प्राणादिमत् भवति। यथा घटः। न चेदं जीवच्छरीरं तथा। तस्मान्न तथेति। अत्र जीवच्छरीरस्य सात्म हि२
कत्वं साध्यं प्राणादिमत्त्वं हेतुः। स च केवलव्यतिरेकी। अन्वयव्याप्तेरभावात्। तथा हि। यत्प्राणादिमत् तत्सात्मकं

तर्भा० यथाऽमुक इति दृष्टांतो नास्ति। जीवच्छरीरं सत्पक्ष एव। लक्षणमपि केवलव्यतिरेकी हेतुः। यथा गंधवत्त्वं पृथि
१० वीलक्षणं विवादपदं पृथिवीतिव्यवहर्त्तव्यं गंधवत्त्वात्। यन्न पृथिवीतिव्यवह्रियते। तन्न गंधवत् यथाऽऽप
ः। प्रमाणलक्षणं वा यथा प्रमाकरणत्वं। तथाहि। प्रत्यक्षादि प्रमाणमितिव्यवहर्त्तव्यं। प्रमाकरणत्वात्।
ति यत्प्रमाणमिति न व्यवह्रियते न तत्प्रमाकरणं यथा प्रत्यक्षाभासादि। न पुनस्तथेदं। तस्मान्न तथेति केवल
व्यतिरेकी। अन्वयव्याप्तेरभावात्। तथाहि। यत्प्रमाकरणं तत्प्रमाणमितिव्यवहर्त्तव्यं। यथाऽमुक इति दृ
ष्टांतो नास्ति। प्रमाणमात्रस्य पक्षीकृतत्वात्। अत्र व्यवहारः साध्यो न तु प्रमाणत्वं। तस्य प्रमाकरणत्वाद्धे
तोरभेदेन साध्याभेददोषप्रसंगात्। केवलव्यतिरेकिणो दर्शिताः। कश्चिदन्यो हेतुः केवलान्वयी। यथा विशे राम०
षोऽभिधेयः प्रमेयत्वात्। यत्प्रमेयं तदभिधेयं यथा घटः। तथा चायं तस्मात्तथेति। अत्र विशेषस्याभिधेयत्वं १०

साध्यं प्रमेयत्वं हेतुः। स च केवलान्वयी। यदभिधेयं न भवति तज्ज्ञेयं न भवति यथाऽस्तुक इति दृष्टांतो नास्ति स
र्वत्र हि प्रामाणिक एवार्थो दृष्टांतः। स च प्रमेयश्चाभिधेयश्चेति। एतेषां चान्वयव्यतिरेकी केवलान्वयि केवलव्य
रेका३ तिरेकि हेतूनां त्रयाणां मध्ये यो हेतुरन्वयव्यतिरेकी स पंचरूपोपपन्न एव स्वसाध्यं साधयितुं क्षमते। न त्वेकेनापि रू
पेण हीनः। तानि तु पंच रूपाणि। पक्षधर्मत्वं। सपक्षे सत्वं। विपक्षाद्व्यावृत्तिः। अबाधितविषयत्वं। असत्प्रति
पक्षत्वं चेति। एतानि पंच रूपाणि धूमवत्त्वादन्वयव्यतिरेकिणि हेतौ विद्यंते। धूमवत्त्वं हि पक्षस्य पर्वतस्य तथाहि ४
धर्मः। पर्वते तस्य विद्यमानत्वात्। एवं सपक्षे सत्वं सपक्षे महानसे विद्यत इत्यर्थः। एवं विपक्षान्महाह्रदात्
ले व्यावृत्तिः। तत्र नास्तीत्यर्थः। एवमबाधितविषयं धूमवत्त्वं। तथाहि। धूमवत्त्वस्य हेतोर्विषयः साध्यो धर्मः। त
त्राग्निमत्त्वं केनापि प्रमाणेनाबाधितं न खंडितमित्यर्थः। एवमसत्प्र[illegible]ऽस्येत्यसत्प्रतिपक्षं धूमवत्त्वं॥ प१

द्वयंसामर्थ्ये२

सत१

त०भा० तथा ॥ साध्यविपरीतसाधकहेतवस्तु प्रतिपक्षा इति । यथा । स च धूमवन्त्वे हेतौ नास्त्येव । अनुपलंभात् । न देवं पंचापि

११ रूपाणि धूमवत्वे हेतौ विद्यंते । तेनैव धूमवत्वं अग्निमत्वस्य गमकं । अग्निमत्वस्य साधकं । अत्र । पक्षधर्मत्वहे

त्व तोः पक्षधर्मताबलादिति चेत् । तथा हि । अनुमानस्य द्वे अंगे व्याप्तिः पक्षधर्मता च । तत्र व्याप्त्या साध्यसा

मान्यसिद्धिः । पक्षधर्मताबलात्साध्यस्य प तस्थत्वं विशेषः सिद्ध्यति । पक्षधर्मेण धूमवत्वेन वह्निरपि व४

पर्वतसंबद्ध एवानुमीयते । अन्यथा साध्यसामान्यस्य व्याप्तिग्राहकादेव सिद्धेः फलमनुमानेन । यस्त्वन्वयो

पंच व्यन्वयव्यतिरेकी हेतुः स च पंचरूपोपपन्न एव सद्धेतुः ॥ अन्यथा हेत्वाभासो अहेतुरिति यावत् । केवलान्व एवं२

यी चतुरूपोपपन्न एव स्वसाध्यं साधयति । तस्य विप क्षाद्व्यावृत्तिर्नास्ति विपक्षाभावात् । केवलव्यतिरे राम०

की चतूरूपोपपन्न एव तस्य सपक्षे सत्त्वं नास्ति । सपक्षाभावात् । के पुनः पक्षसपक्षविपक्षाः । उच्यंते । संदि ११

ग्धसाध्यधर्मा धर्मी पक्षः। यथा धूमानुमाने पर्वतः॥ सपक्षः निश्चितसाध्यधर्मा धर्मी। यथा तत्रैव धूमानु
माने महानसः॥ विपक्षः निश्चितसाध्याभाववान् धर्मी। यथा तत्रैव महाह्रदः॥ [illegible]
क्ति केवलान्वयिकेवलव्यतिरेकिणो दर्शिताः॥ अतोऽन्ये हेत्वाभासाः॥ ते चासिद्धविरुद्धानैकान्तिकप्रकरण
समकालात्ययापदिष्टभेदात्पंचैव। तत्रानिश्चितपक्षवृत्तिरसिद्धः॥ स च त्रिविधः॥ आश्रयासिद्धः स्व
रूपासिद्धो॥ यथा गगनारविंदं सुरभि। अरविंदत्वात् सरोजारविंदवत्। अत्र हि गगनारविंदं आश्रयः स च
नास्त्येव॥ स्वरूपासिद्धो यथा। शब्दो नित्यश्चाक्षुषत्वात्। घटवत्। अत्र चाक्षुषत्वं हेतुः स च शब्दे नास्त्ये
व। शब्दस्य श्रावणत्वात्॥ व्याप्यत्वासिद्धस्तु द्विविधः॥ एको व्याप्तिग्राहक [illegible] भावात्। अपर उपाधिस
द्भावात्। तत्र प्रथमो यथा। यत्सत्तत्क्षणिकं यथा जलधरः संश्च शब्दादिः॥ न च सत्त्वक्षणिकत्वयोर्व्याप्ति

[illegible] प्रयोजकं [illegible] साध्य [illegible] व्याप्य [illegible] दृष्टंपाधि [illegible] न बाधितानिषिद्धत्वे [illegible] धर्म
स्वव्यापकं यतो [illegible] धर्मीतत्वतत्राय [illegible] निषिद्धत्वे [illegible] व्याप्य [illegible] तन्न [illegible] इत्यादि [illegible]

त॰सं॰ १२ हकं प्रमाणमस्ति। सोपाधिः। तयास्वस्य व्याप्यत्वासिद्धा। असमानायां स॥ केवलमन्यत्र क्रमिसम्भक प्राप्तस्या
त्। द्वितीयो यथा। क्रत्वंतर्वर्तिनी हिंसा अधर्मसाधनं हिंसात्वात्। क्रत्वबाह्यहिंसावत्। अत्र अधर्मसाधनत्वे हिंसा
त्वं न प्रयोजकं। किंतु निषिद्धत्वं। यागीयपशुहिंसायां निषिद्धत्वाभावात्। तदेवं निषिद्धत्वस्योपाधेस्सद्भावात्। अन्यप्र
युक्तत्वरूपजीविहिंसात्वं व्याप्यत्वासिद्धमेव। साध्यविपर्ययव्याप्तो हेतुर्विरुद्धः॥ स यथा। शब्दः नित्यः कृतकत्वात् घटव
त्। कृतकत्वं हि साध्यविपरीतानित्यत्वेन व्याप्तं। यतो यत्कृतकं तदनित्यं। अतो विरुद्धं कृतकत्वमिति। सव्यभिचारोऽनैकां
तिकः। स द्विविधः। साधारणानैकांतिकोऽसाधारणानैकांतिकश्चेति। तत्र पक्षसपक्षविपक्षवृत्तिः साधारणानैकांति
कः। स यथा शब्दो नित्यः प्रमेयत्वात्। व्योमवत्। तत्र प्रमेयत्वं हेतुः। तच्च नित्यानित्यवृत्ति। सपक्षविपक्षाभ्यां व्यावृत्तो राम॰
पक्षएवमात्रवृत्तिरसाधारणानैकांतिकः। स यथा भूर्नित्या गंधवत्त्वात्। गंधवत्त्वं हि सपक्षान्नित्यात् विपक्षाच्चानित्या ११

साध्याभावत्वंभूमान्वर्त्तन्ति। प्रकरणसमः [illegible] यस्य हेतोः साध्यविपरीतसाधकं हेत्वन्तरं विद्यते। यथा। शब्दः नित्यः अनि
त्यधर्मरहितत्वात्। शब्दः अनित्यः नित्यधर्मानुपलब्धेरिति। अयमेव सत्प्रतिपक्ष इत्युच्यते। पक्षे प्रमाणान्तरावधृतसा
ध्याभावो हेतुर्बाधितविषयः। कालात्ययापदिष्ट इति। यथा। अग्निरनुष्णः पदार्थत्वात्। जलवत्। अत्र हि पदार्थत्वस्य
हेतोः साध्याभावमनुष्णत्वं तदभावः प्रत्यक्षेणैवावधारितः। स्पर्शनप्रत्यक्षेणोष्णत्वोपलम्भात्॥ ॥व्याख्यातमनुमा
...गोपमानविस्तरो॥ नं। अतिदेशवाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्टपिंडज्ञानमुपमानं। गवयमजानन्नपि यथा गौस्तथा गव यथा।
य इति कुतश्चिदारण्यकपुरुषाच्छ्रुत्वा वनं गतो वाक्यार्थं स्मरन्यदा गोसादृश्यविशिष्टपिंडं पश्यति तदा तद्वाक्यार्थस्म
रणसहकृतं गोसादृश्यविशिष्टपिंडज्ञानमुपमानं। उपमितिप्रतिकरणत्वात्। [illegible] सादृश्यविशिष्टपिंडदर्शनान
न्तरं अयमसौ गवयशब्दवाच्यः पिंड इति संज्ञासंज्ञिसम्बन्धप्रतीतिरुपमितिः। सैव फलं॥ व्याख्यातमुपमानं॥

अथवादो निरूप्यते।

न०भी० आप्तवाक्यं शब्दः। आप्तस्तु यथाभूतस्यार्थस्योपदेष्टा पुरुषः। वाक्यं तु आकांक्षायोग्यतासंनिधिमतां पदानां समूहः। अ
१२ त एव गौरश्वः पुरुषो हस्तीति पदानि न वाक्यं परस्पराकांक्षाविरहात्। अग्निना सिंचेदिति न वाक्यं योग्यताविरहात्। न ह्यग्नि
सेकयोः परस्परान्वययोग्यतास्ति। तथाहि। अग्निनेति तृतीयपादे करूपैककार्यप्रतिकरणत्वमग्नेः प्रतिपादितं। न चा
ग्निसेककरूपैककार्यप्रतिकरणत्वं भवितुं योग्यः। तेन न कार्यकारणभावबहुत्वसंबंधोऽग्निसेकयोः योग्यत्वात्। अग्नि
नासिंचेदिति न वाक्यं। तस्यामपि परस्पराकांक्षायां योग्यताविरहात्। यूपमेवैकैकशः प्रहरे प्रहरे असहोच्चारितानि गा
मानयेत्यादिपदानि न वाक्यं। तासामपि परस्पराकांक्षायां सत्यामपि परस्परान्वययोग्यतायां परस्परसंनिध्या
भावात्। यानि तु साकांक्षाणि परस्परान्वययोग्यानि संनिहितानि च पदानि तान्येव वाक्यं। यथा ज्योतिष्टोमेन स्व राम०
र्गं। मोपजेत्यादि। अर्थवानर्दीतिरपंच फलानि सेपति। अर्थवान्तान्येव गामानयेत्यादीन्यविलंबेनोच्चारितानि प १३

द्दानिव क्येन [illegible] द्यापि पदानि न साकांक्षाणि । किंत्वयं गङ्गादीनामाधेयानां तीराद्याधाराकांक्षितत्वात् । न च विचार्य
माणो ऽर्थो ऽपि साकांक्षः । आकांक्षाया इच्छात्मकत्वेन चेतनधर्मत्वात् । सत्यं । अ[illegible] वक्तृपदं श्रोतुर[illegible]न्यान्य
विषयाकांक्षाजनकत्वेन साकांक्षा उच्यंते । तद्वारेण तत्प्रतिपादकानि पदानि साकांक्षाणीत्युपचर्यंते । यद्वा पदान्येव
स्वार्थप्रतिपाद्यार्थांतरविषयाकांक्षाजनकत्वेनोपचारात्साकांक्षाणि । एवं [illegible] आकांक्षाः परस्परान्वययोग्यः तथा
रापदार्थस्य विघोग्यताम्युच्यते । सन्निहितत्वं तु पदानामेकेनैव [illegible]मा ऽविलंबोच्चारितत्वं । तच्च सामीप्यादेव पदेषु संभवति नार्थेषु
रात्तेनापरस्यसंपत्तेः । अर्थप्रतिपादनद्वारा श्रोतुः पदांतरविषयामर्थांतरविषयां वा आकांक्षां जनयतां प्रतीयमा
नपरस्परान्वययोग्य[illegible]र्थप्रतिपादकानां सन्निहितानां पदानां समूहो वाक्यं । पदं च वर्णसमूहः । समूहश्चात्र एकज्ञा
नविषयीभाव एव । अत्र वर्णानां क्रमभवतामाशुतरविनाशि[illegible] कथं अनेकवर्णानुभवासंभवात् । पूर्वपूर्ववर्णान

तर्का० नुभूय अंत्यवर्णश्रवणकाले पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेनांत्यवर्णसंबंधेन पदं व्युत्पादनसमयग्रहा
१४ नुगृहीतेन श्रोत्रेंद्रियेणैकैवमहंनेकवर्णावगाहिनी पदप्रतीतिर्जन्यते। सहकारिसामर्थ्यात्। प्रत्यभिज्ञानवत्। प्र
त्यभिज्ञाने प्रत्यक्षेणातीतापि पूर्वावस्था स्फुरत्येव। ततः पूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनांत्यपदविषये ण
ता०३ पदावगाहिनी वाक्यप्रतीतिः क्रियते। तदिदं शक्यमाप्तपुरुषेण प्रयुक्तं शब्दनामकं प्रमाणं। फलं तस्य वाक्यार्थज्ञानं
तथ्यच्नामकं ।तत्रैव शब्दप्रमाणलक्षणं लोके वेदे च साधारणं। लोके त्वयं विशेषः। यः कश्चिदेवाप्तो भवति न सर्वः। अतः किंचिदे
व लौकिकवाक्यं प्रमाणं यदाप्तकर्तृकं। वेदस्तु परमाप्तश्रीमहेश्वरकृतत्वेन सर्वमेव वाक्यं प्रमाणं। सर्वस्यैवाप्तवाक्य
त्वात्।। ।।वर्णितानि चत्वारि प्रमाणानि। एतेभ्योन्यन्न प्रमाणं। प्रमाणस्य सतोत्रैवांतर्भावात्। न त्वर्थापत्तिरपि तर्क०
पृथक्प्रमाणमस्ति। तथाहि। पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा रात्रिभोजनं कल्प्यते। दिवाऽभुंजानस्य देवदत्त १४

रात्रिभोजनस्य ३

स्य पुंसः पीनत्वं रात्रिभोजनमंतरेणानोपपद्यते। अनुपपद्यमानार्थदर्शनात्त् उपपादकार्थांतरकल्पनमर्थापत्तिः॥
अतः पीनत्वान्यथानुपपत्तिप्रसूतार्थापत्तिरेव रात्रिभोजने प्रमाणं। तच्च प्रत्यक्षादिभ्यो भिन्नं। रात्रिभोजनस्य प्रत्
क्षाद्यविषयत्वात्। नैतत्। अनुमानविषयत्वेन तत्रैवांतर्भावात्। तथा हि। अयं देवदत्तो रात्रौ भुंक्ते। दिवाऽभुंजानत्वे स दिवाऽ४
ति पीनत्वात्। यस्तु रात्रौ न भुंक्ते नासौ भुंजानत्वे सति पीनः। यथा दिवारात्रौऽभुंजानोऽपीनः। न चायं तथा। तस्मान्न
तथेति। केवलव्यतिरेक्यनुमानेनैव रात्रिभोजनस्य प्रतीयमानत्वात्। किमर्थमर्थापत्तिः कल्पनीया। ननु अभा
वाख्यं पृथक् प्रमाणमस्ति तच्चाभावग्रहणायांगीकरणीयं। तथा हि। घटो घटानुपलब्ध्या घटाभावो गृह्यते इति अ घ३नि श्वी३
प्रमा२ भावग्रहणेनद्वयाद्यभावो गृह्यते। नैतत्। यद्यत्र घटोऽभविष्यत्तर्हि भूतलमिवाद्रक्ष्यत इत्यादितर्कसहकारिणाऽ
नुपलंभसनाथेनप्रत्यक्षेणैवाभावग्रहणात्। अनु इंद्रियाणि संबद्धार्थग्राहकाणि। तथा हि। इंद्रियाणि वस्तुप्राप्यप्र

किमभावप्रमाणेनेति ७ स्यैव ३अनुपलब्धिर्नोपलब्धेरभावः ३

त॰मं॰ १५ काशकानि। ज्ञानकरणत्वात्। आलोकवत्। यद्वा चक्षुःश्रोत्रे वस्तुप्राप्यप्रकाशकारिणी इंद्रियत्वात्। त्वगादिवत्। [illegible]
१५ द्रियाणां वस्तुप्राप्यकारित्वमुभयवादिसिद्धमेव। न चेंद्रियाभावयोः संबंधोस्ति। संयोगसमवाययोर्हि संबंधो न
वतोस्तयोस्त इति। विशेषणविशेष्यभावश्च संबंध एव न भवति। भिन्नोभयाश्रितैकत्वाभावात्। संबंधो हि संबंधि
भ्यां भिन्नो भवति। उभयाश्रितश्चैकश्चेति। यथा भेरीदंडयोः [illegible]यागः। स हि भेरीदंडाभ्यां भिन्नः। तावाश्रितश्चैकश्चे
ति। न च विशेषणविशेष्यभावस्तथा। तथा हि। न च दंडपुरुषयोर्विशेषणविशेष्यभावोऽन्ताभ्यां भिद्यते। न हि दंड
नापि दंडवत स्य विशेष्यत्वं स्य विशेषणत्वमर्थांतरं अपि तु स्वरूपमेव। अभावस्यापि विशेषणत्वात्। न चाभावेऽस्य चित्सहार्थस्य स्वा [illegible]
तमस्य संभवः। तस्मादभावस्य [redacted] वस्तोपरक्तबुद्धिजनकं पस्वरूपं तदेव विशेषणत्वं। न तु दार्थांतरं। एवं व्या रा॰मं॰
प्यत्वं व्यापकत्वं कार्यकारणत्वादयोऽप्यूह्याः स्वप्रतिपत्त्रिवद्बुद्धिजनकं स्वरूपमेव हि व्यापकत्वमग्न्यादीनां। कार १५
३ द्रव्ययोरेव संयोग इति नियमात्।। अभावस्य च द्रव्यत्वाभावात्।। अयुतसिद्धत्वाभावान् समवायोऽपि।। ३

णत्वमपिकाय ६ ज्ञानान्वयव्यतिरेके स्वरूपमेकान्तवादिनो। नस्वर्धांतरं। अभावस्यापि व्यापकत्वात्कारणत्वाच्च। नस
भावेसामान्यादिसंभवः। नत्वेवं विशेषणविशेष्यभावो न विशेषणविशे[ष्य]रूपाभ्यां भिन्नो नाप्युभयाश्रितः॥
विशेषणे विशेषणाभावमात्रस्य मत्वात्। विशेष्यभावस्याभावात्। नाप्येकः। विशेषणं च विशेष्यं च तयो भावश्च ति
ष्ठांतेऽप्ययमारोभावश्चाहु प्रत्येकमभिसंबध्यते। तथा च विशेषणाभावो विशेष्यभावश्चेत्यापन्नं। द्वौ चेत्तौ। एकस्यत
संबंधः। तस्माद्विशेषणाः विशेष्यभावो न संबंधः। एकस्याप्यव्यापकत्वाभावस्यापि। तेवेद्यशब्दप्रयोगस्तूभयनिरूपणी
यत्वमात्रधर्मिणोपचारात्। तथा चाभावस्याभावस्येंद्रियेणाग्रहणं न संभवति। सत्यं। नावावच्छिन्नत्वाद्याभेः। भावंप्र
फिर काशापदिंद्रियं प्राप्तमेव प्रकाशयति। न त्वभावं। अभावं प्रकाशयदिंद्रियं विशेषणविशेष्यमुखेनैवेति सिद्धांतः॥
अत्र संबद्धाभावग्रहेऽत्रति प्रसंगोऽपसक्तं विशेषणतयैव निरस्तः। समस्तपरमतौपत्रो भयोः समोदोषः परिहारो
व्याति

ःपर्यनु

भा०त० पिवासमस्तनैकस्तत्र जिपोक्तव्यस्ताहगथकिचारणो॥ ॥इत्यमिरसनीनिरूप्यते।जलादिज्ञानेजातेतस्यप्रामाण्यमव
१६ धार्यकश्चिज्जलाहिषुप्रवर्त्तते।कश्चित्संदेहादेवप्रवृत्तः।प्रवृत्त्युत्तरकालेजलप्रतिलंभेसतिप्रामाण्यमवधारयतीइ
तिवस्तुगतिः॥अत्रकश्चिदाह।प्रागेवप्रामाण्यमवधार्यपुरुषःप्रवर्त्तते।स्वतएवप्रामाण्यावधारणात्।अस्यार्थः।
ऊत४ येनैवज्ञानंगृह्यतेतेनैवतत्प्रामाण्यमपिगृह्यते।नतुज्ञानग्राहकादन्यत्तज्ञानधर्मस्यप्रामाण्यस्यग्राहकं।तेनज्ञान
ग्राहकादतिरिक्तानपेक्षत्वमेवस्वतस्त्वंप्रा॥माण्यस्य।ज्ञानंचप्रवृत्तेःपूर्वमेवगृहीतं।कथमन्यथाप्रामाण्य। ः।प्रामाण्य प्रथमंवत्प्राप
संदेहोपिस्यात्।अनधिगतेधर्मिणिसंदेहानुत्पातात्।तस्मात्प्रवृत्तेःपूर्वमेवज्ञाततान्यथानुपपत्तिप्रसूतार्थाप
त्याज्ञानेगृहीतेज्ञानगतंप्रामाण्यमप्यर्थापत्त्यैवगृहीत्वापुरुषःप्र॰र्त्तते।नतुप्रथमंज्ञानमात्रंगृह्यते।ततःप्रवृ रा०म०
मे त्युत्तरकालेजलप्रतिलंभेजातेतस्य ॥तस्यप्रामाण्य॰मवधार्यते।उच्यते।ज्ञाततान्यथानुपपत्तिप्रसूतार्थाप १६

स्याज्ज्ञानं॰ स्यतेइ। ॰ ॐतदेकन॰ ष्यामहे। तथा प्रामाण्यग्रहणे तु रत एवा। तथा हि। इदं किल परस्याभिमतं। घट
जाते दिविषयज्ञाने मया ज्ञातोऽयं घट इति ॰ रस्य ज्ञातत्वं प्रतिपद्यते। तेन ज्ञाने जाते ज्ञातता नाम कश्चिद्धर्मो ज्ञायत
इत्यनुमीयते। स च ज्ञानात्पूर्वमज्ञाततान्न ज्ञाते ज्ञाते च ज्ञातत्वात् इति अन्वयव्यतिरेकाभ्यां ज्ञानेन जन्यते इति अव
धार्यते। एवं ज्ञानजन्योऽसौ ज्ञातता नाम धर्मो ज्ञानमन्तरेण नोपपद्यते। कारणाभावे कार्यानुदयात्। तेनार्थाप
त्त्या स्वकारणं ज्ञानं ज्ञातता नयाऽनुपपत्त्यत इति। न चैतद्युक्तं। ज्ञानविषयतातिरिक्तायाः ज्ञाततायाः अभावात्। ननु ज्ञा
नजनितज्ञातताधारत्वमेव घटादेर्ज्ञानविषयत्वं। तथा हि। न तावत् ज्ञानात्म्येन विषयता। घटज्ञानयोस्तादात्म्या
नभ्युपगमात्। तदुत्पत्त्या तु विषयत्वे इन्द्रियादेरपि विषयत्वापत्तिः। इन्द्रियादेरपि तस्य ज्ञानस्योत्पत्तेः। तेनेदमनुमी
यते। ज्ञाने जाते किंचिज्जनितं येन घट एव तस्य ज्ञानस्य विषयः नान्य इति। अतो ज्ञानविषयत्वान्यथानुपपत्त्ये

भा० घा० यज्ञाततासिद्धिः। न प्रत्यक्षमात्रेण। मैवं। स्वम[illegible] विषयत्वोपपत्तेः। अर्थज्ञानयोरीदृशएव स्वाभाविको विशेषः। यो
१७ तानयो विषयविषयीभावः संबंधः। इतरथा अतीतानागतयोर्विषयत्वं न स्यात्। ज्ञाने न तत्र तज्ज्ञातताजननासंभ
वात्। असति धर्मिणि धर्मजननायोगात्। किंच। ज्ञाततायां अपि ज्ञानविषयत्वात् तत्रापि ज्ञाततांतरस्वसंगः। तथा चा
नवस्था। अथ ज्ञाततांतरमंतरेणापि स्वभावादेव विषयत्वं ज्ञाततायाः एवं चेत् घटादावपि किं ज्ञाततया। अस्तु वा
ज्ञातता। तथापि तन्मात्रेणापि ज्ञानमात्रं गृह्यते। [illegible]ज्ञातता वि[illegible] तु प्रमाणज्ञानाव्यभिचा[illegible]ण प्रामाण्यमिति
कुत एव ज्ञानग्राहकग्राह्यता प्रामाण्यस्य। अथ केन चित् ज्ञातताविशेषेण प्रमाणज्ञानाव्यभिचारिणा ज्ञानग्रा
माण्ये सहैव गृह्यते एवं चेत् [illegible]प्रामाण्येपि शक्यमिदं वक्तुं। केन चित् ज्ञातताविशेषेण [illegible]ज्ञानाव्यभिचारिणा राम०
ज्ञानाप्रा[illegible]न सहैव गृह्यते। इत्यप्रामाण्यमपि स्वत एव गृह्यतां। अथैवमपि अप्रामाण्यं परतः प्रामाण्यमपि १७
तथा

परतएवगृह्यते।ज्ञानग्राहकात्स्वतइत्यर्थः।ज्ञानेहिमानसप्रत्यक्षेणगृह्यतेप्रामाण्यं नर मानेनातथाहि
जलज्ञानानन्तरंजलार्थिनःप्रवृत्तिर्द्वेधा।फलवत्यफलाचेति।तत्रफलवतीयाप्रवृत्तिःसासमर्था।तयाज्ञान
स्ययथार्थत्वमनुमीयते।प्रयोगः।विवादास्पदीभूतंजलज्ञानंप्रमाणंसमर्थप्रवृत्तिजनकत्वात्।यन्नुनप्रमा
णंनतत्समर्थबुद्धिजनकंयथाऽप्रमाणाभासइतिकेवलव्यतिरेकी।तत्रतत्प्रवृत्तिजनकंयज्जलज्ञानंतत्फलः।
तस्यप्रामाण्येसाध्येपर्याप्त्यर्थमित्यर्थः।ननुप्रमाकरणत्वंतस्मात्पोव्यभिचारापत्तेः।हेतुसमर्थप्रवृत्तिजन
कत्वं।फलवत्प्रवृत्तिजनकत्वमितियावत्।अत्रेननुकेवलव्यतिरेक्यनुमानेनज्ञानाभासदृष्टान्तस्यज्ञानस्यप्रा
माण्येऽवधारितेनदृष्टान्तेनप्रवृत्तेःपूर्वमपितज्जातीयत्वेनलिंगेनान्वयव्यतिरेकिणाऽन्यस्यज्ञानस्याभास
दृष्टान्तस्यप्रामाण्यमनुमीयते।अस्मात्परतएवप्रामाण्यं गृह्यते।ननुज्ञानग्राहकेणगृह्यतइति।

भा॰षा॰ वत्तायेव॰ प्रमाणानि युक्तिलेशोक्तिपूर्वं केश[illegible]लवोधाय यथाशास्त्रमवर्णयदिति ॥ ॥ प्रमाणात्मकानि ॥
१८ प्रमेयाण्युच्यंते । आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रं ॥
। तत्रात्मत्वसामान्यवानात्मा । स च देहेंद्रियादिव्यतिरिक्तः । प्रतिशरीरं भिन्नो विभुर्नित्यश्च । स च मानसप्रत्यक्षः
। विप्रतिपन्नं तु बुद्ध्यादिगुणलिंगकः । तथाहि । बुद्ध्यादयस्तावद्गुणाः । अनित्यत्वे सति एकेंद्रियग्राह्यत्वात् रू
पवत् । गुणाश्च गुणाश्रिता एव । तत्र बुद्ध्यादयो न भूतानां गुणाः मानसप्रत्यक्षत्वात् । ये हि भूतानां गुणा न ते म
नसा गृह्यंते यथा रूपादयः । नापि दिक्कालमनसां गुणाः विशेषगुणत्वात् । ये हि दिगादिगुणाः संख्यादयः ।
न ते विशेषगुणाः । ते हि सर्वद्रव्यसाधारणा एव । बुद्ध्यादयस्तु विशेषगुणाः । गुणत्वे सत्येकेंद्रियग्राह्यत्वात् । राम॰
रूपवत् । अतो न दिगादिगुणाः । तस्मादेभ्योऽष्टभ्योऽतिरिक्तो बुद्ध्यादीनामाश्रयो द्रष्टव्यः । स एवात्मा । प्रयोगश्च १८

बुध्यादयः पृथिव्याद्यष्टद्रव्यातिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सतिगुणत्वात् । यस्तु पृथिव्याद्यष्ट
द्रव्यातिरिक्तद्रव्याश्रितो न भवति नासौ पृथिव्याद्यष्टद्रव्यानाश्रितो गुणः यथा रूपमिति केवलव्यतिरेकी । अ
न्वयव्यतिरेकी वा । तथा हि । बुध्यादयः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे स
तिगुणत्वात् । यापनाश्रितो सतइतिरिक्ताश्रितो न भवति यथा पृथिव्याद्यनाश्रितः शब्दः पृथिव्याद्यतिरिक्ताका
शाश्रित इति । तदेवं पृथिव्याद्यष्टद्रव्यातिरिक्तं नवमद्रव्यमात्मा सिद्धः । स च सर्वत्र कार्योपलंभाद्विभुः परममह
त्परिमाण ।ानित्यर्थः । विभुत्वान्नित्यो ।ोऽपि भवत । सुखादिवैचित्र्यात्प्रतिशरीरं भिन्नः । तस्य भोगायतनं शरीरं ।
सुखदुःखान्यतरानुभवो भोगः । यदवच्छिन्ने आत्मनि भोगो जायते तद्भोगायतनं तदेव शरीरं । चेष्टाश्रयो वा शरी
रं । चेष्टा तु हिताहितप्राप्तिपरिहारार्था क्रिया न तु स्पंदनमात्रं । शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियं । अतीन्द्रियमि

त०भा०
१९

न्द्रियमित्यत्रमानं॰ ।लोदेरपीन्द्रियत्वप्रसंगः ।अत उक्तं ज्ञानकरणमिति।तथापीन्द्रियार्थसंनि॰र्षेऽतिप्रसंगः।अत उ
क्तं शरीरसंयुक्तमिति।शरीरसंयुक्तं ज्ञानकरणमित्युक्ते आलोकादेरपीन्द्रियत्वप्रसंगः।अत उक्तमतीन्द्रियमिति॥
तानि चेन्द्रियाणि षट्। घ्राणरसनचक्षुःश्रोत्रत्वङ्मनांसि।तत्र गंधोपलब्धिसाधनमिन्द्रियं घ्राणं।तच्च नासाग्रव
र्ति।तच्च पार्थिवं।गंधवत्वात्।गंधवत्वं च गंधग्राहकत्वात्।यदिन्द्रियं रूपादिषु पंचसु मध्ये यं गुणं गृह्णाति तदिन्द्रि
यं तद्गुणसंयुक्तं।यथा चक्षुः रूपग्राहकं रूपवत्।गंधग्राहकं घ्राणं।अतो गंधवत्।रसोपलब्धिसाधनमिन्द्रियं र
सनं।जिह्वाग्रवर्ति।तच्चाप्यं।रूपादिषु पंचसु मध्ये रसस्यैवाभिव्यंजकत्वात्।लालावत्। रूपोप॰ लब्धिसाधनमिन्द्रि
यं चक्षुः।कृष्णताराग्रवर्ति।तच्च तैजसं।रूपादिषु पंचसु मध्ये रूपस्यैवाभिव्यंजकत्वात्।प्रदीपवत्।स्पर्शोप राम०
लब्धिसाधनमिन्द्रियं त्वक्।सर्वशरीरव्यापि त्वक्स्थं।तच्च वायवीयं।रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वा १८

ताअंगसंगिसलिलशैत्याभिव्यंजकवायु॰ पत्ता। शब्दोपलब्धिसाधनमिंद्रियं श्रोत्रं। तच्चाकाशं कर्णशष्कुल्यवच्छिन्नं नभः। श्रो
त्रं। ननु द्रव्यांतरं। शब्दगुणवत्वात्। तदपि शब्दग्राहकत्वात्। यदिंद्रियं रूपादिषु पंचसु मध्ये यं गुणं व्यंजकं तद्गु तद्गु
णयुक्तं। यथा चक्षुरादि। रूपादिग्राहकं रूपादिमत्। शब्दग्राहकं श्रोत्रं अतः शब्दगुणं। सुखदुःखोपलब्धिसाधनमिंद्रि छि
यं मनः। तच्चाणुपरिमाणं। ननु चक्षुरादींद्रियसद्भावे किं प्रमाणं। उच्यते अनुमानमेव रूपाद्युपलब्धयः करण
साध्याः। क्रियात्वात्। छिदिक्रियावत्। अथ पदार्थाः। द्रव्यगुणकर्मसामान्यविशेषसमवायाः। प्रमाणाद
योप्यत्रैवांतर्भवंति। तथापि प्रयोजनवशाद्देहेन्द्रियकीर्तनं। समवायिकारणं द्रव्यं। गुणाश्रयो वा द्रव्यं। तानि च द्र
व्याणि। पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। तत्र पृथिवीत्वसामान्यवती पृथिवी। काठिन्यको
मलाद्यवयवसंयोगविशेषयुक्ता। घ्राणशरीरमृत्पिंडपाषाणवज्रवृक्षादिरूपा। रूपरसगंधस्पर्शसंख्याप

तं०भा० रिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती। सा च नित्याऽनित्या। परमाणुरूपा नित्या। कार्य
२० रूपा त्वनित्या। द्विविधाया अपि पृथिव्या रूपरसगंधस्पर्शाः अनित्याः पाकजाश्च। पाकस्तेजःसंयोगः। तेन पृथिव्या
ः पूर्वरूपादयो नश्यंति। अन्ये जन्यंत इति पाकजाः। अप्त्वसामान्ययुक्ता आपः। रसनेंद्रियशरीरसरित्समुद्र
हिमकरकादिरूपाः। गंधवर्जस्नेहयुक्तपूर्वोक्तगुणवत्यः। नित्यानित्याश्च। नित्यानां रूपादयो नित्या एव। अनित्या
नां अनित्या एव। तेजस्त्वसामान्यवत्तेजः। तच्चक्षुः सवितृसुवर्णवह्निविद्युतादिभेदं। रूपस्पर्शसंख्यापरिमाणपृथ
क्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्। नित्यमनित्यं पूर्ववत्। तच्चतुर्विधं। दिव्यं भौममौदर्यमाकरजं चेति।
उद्भूतरूपस्पर्शं। अनुद्भूतरूपस्पर्शं। अनुद्भूतरूपमुद्भूतस्पर्शं उद्भूतरूपमनु[द्भू]तस्पर्शं। उद्भूतरूपस्पर्शं यथा राम०
सौरादितेजः। सुवर्णं तु उद्भूताभिभूतरूपस्पर्शं। नानुद्भूतरूपस्पर्शं। अनुद्भूतरूपत्वे अचाक्षुषत्वं स्यात्। अनुद्भूतस्पर्शे २०

ता० पस्प०

त.स.छा.ने.१ ते त्वचांऽभिभवस्तुबलवत्सजातीयेन पार्थिवेन रूपेण स्पर्शेन च कृतः। अनुद्भूतरूपस्पर्शं यथा चक्षुरिंद्रियं। अनुद्भूत
रूपं उद्भूतरूपस्पर्शं यथा तप्तवारिस्थं तेजः। उद्भूतरूपं अनुद्भूतस्पर्शं यथा प्रदीपप्रभामंडलं। वायुत्वाभिसंबंधवान्वा
युः। त्वगिंद्रियशरीरप्राणवातादिभेदः। स्पर्श[illegible]रिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगवान्। स च स्प
र्शानुमेयः। तथा हि। योऽयं वायौ वाति सति अनुष्णाशीतस्पर्श उपलभ्यते। स गुणत्वात् गुणिनमंतरेणानुपपद्यमानो गुणि
नमनुमापयति। गुणी च वायुरेव पृथिव्यामनुपलब्धेः। पृथिवी वायुव्यतिरेकेणानुष्णाशीतस्पर्शाभावात्। पृथिव्यां
तु पाकजस्पर्शः। स च द्विविधः। नित्यानित्यभेदात्। परमाणुरूपो नित्यः कार्यरूपस्त्वनित्यः। तत्र पृथिव्यादीनां चतुर्णां
कार्याणां उत्पत्तिविनाशक्रमः कथ्यते। द्वयोः प[illegible]ः क्रियया संयोगे सति द्व्यणुकं उत्पद्यते। तस्य परमाणू सम
वायिकारणं। तत्संयोगोऽसमवायिकारणं। अदृष्टादि निमित्तकारणं। ततस्त्रयाणां द्व्यणुकानां क्रियया संयोगे

चतुरणुकैः १

त॰भा॰ सति अणुकमुत्पद्यते तस्य अणुकालेन समवायिकारणशेषं पूर्ववत् । एवं अणुकैश्चतुरणुको ऽपरः स्थूलः स्थूल
२१ तरः स्थूलतमः । एवं क्रमेण महती पृथिवी महत्य आपः महत्तेजः महांश्च वायुरुत्पद्यते । कार्यगता रूपादयः स्वाश्रयसम
वायिकारणगतेभ्यो रूपादिभ्यो जायंते । कारणगुणाः कार्यगुणानारभंते इति न्यायात् । इत्थं उत्पन्नस्य रूपादिमतः म॰
ऽवयवेषु घटादेरवयवेषु कपालादिषु नोदनादभिघाताद्वा क्रिया ततो विभागः । तेनावयव्यारंभकस्यासमवायिकारणभू
तस्य संयोगस्य नाशः क्रियते । ततः कार्यद्रव्यस्य घटादेरवयविनो नाशः । अवयव्याद्यसमवायिकारणनाशेन द्रव्य
नाशो दर्शितः । क्वचित्समवायिकारणनाशेन द्रव्यनाशः । यथा पूर्वोक्तस्यैव पृथिव्यादेः संहारे संजिहीर्षा महेश्वर
परमा॰ २ स्य संजिहीर्षातो परमाणुषु क्रिया ततः परमाणुविभागः । ततः संयोगनाशेन द्व्यणुके नष्टे त्र्यणुकाश्रयनाशात् त्र्यणुकनाशः । क्र ताम॰ २
मेण पृथिव्यास्तु नाशः । यथा वा तन्तु नाशात् पटनाशः । द्रव्याणां रूपादीनां स्वाश्रयनाशेनैव नाशः । अन्यत्र तु सत्येवाश्रये २१

विरोधि[illegible]वभावेन विनाशः। तथा पाकेन घटादेः रूपादीनां नाशः [illegible]ति। कं[illegible]णसद्भावे प्रमाणं
उच्यते। गवाक्षजालांतरं सूर्यमरीचिस्थं रजः सर्वतः सूक्ष्मतममनुपलभ्यते। तत् स्वल्पपरिमाणद्रव्यारब्धं। कार्यद्रव्य
त्वात्। घटवत्। तच्च द्रव्यं [illegible]। यमिव। महद्द्रव्यारंभकस्य कार्यत्वनियमात्। तदेवं द्व्यणुकाख्यं द्रव्यांतरं सिद्धं। तदपि
स्वल्पसमवायिकारणारब्धं। कार्यद्रव्यत्वात्। घटवत्। यश्च द्व्यणुकारंभकः स एव परमाणुः। स चानारब्ध एव। न
नु कार्यद्रव्यारंभकस्य कार्यद्रव्यत्वाव्यभिचारात्। कथमनारब्धत्वमुच्यते। अनंतकार्यपरंपरादोषप्रसंगात्। तथा
सत्यनंतद्रव्यारब्धत्वाविशेषेण मेरुसर्षपयोरपि तुल्यपरिमाणत्वप्रसंगात्। तस्मादनारब्ध एव परमाणुः॥
द्व्यणुकं तु द्वाभ्यामेव परमाणुभ्यामारब्धं। एकस्यानारंभकत्वात्। त्र्यादिकल्पनायां प्रमाणाभावात्। त्र्यणुकं त्रि
भिरेव द्व्यणुकैरारभ्यते। एकस्यानारंभकत्वात्। द्वाभ्यामारंभे कार्यगतमहत्त्वानुपपत्तिः। कार्ये हि महत्त्वं कारणम

त॰भा॰ ह् ाकारणत्व ... द्वात्तत्र प्रथमस्यासंभवाद्धरमभेपि तद्यां न च च, ...रिकल्पनायां ... मानाभावात्त्रिभिरेव महत्वावे
२२ भोपपत्तेरिति। शब्दगुणमाकाशं। शब्देतरसंख्यापरिमाणपृथक्त्वसंयोगविभागवत्। एकं विभु नित्यं शब्दलिंग। श
ब्दलिंगत्वस्य कथं पारिशेष्यात्। तथा हि। शब्दस्तावद्विशेषगुणः। सामान्यवत्वे सति अस्मदादिबाह्यैकेंद्रियग्रा
ह्यत्वात्। रूपादिवत्। गुणश्च गुण्याश्रित एव। न चास्य पृथिव्यादिचतुष्टये आत्मा च गुणी भवितुमर्हति। श
ब्दस्य श्रोत्रग्राह्यत्वात्। पृथिव्यादिगुणाः न ते श्रोत्रेण गृह्यन्ते। यथा रूपादयः। शब्दस्तु श्रोत्रेण गृह्यते। न दि
क्कालमनसां गुणः विशेषगुणत्वात्। अतः एतेभ्योऽतिरिक्तः शब्दस्य गुणी अनुमीयते। स एवाकाश इति। स च ए
कं भेदप्रमाणाभावात्। एकत्वेनोपपत्तेः। एकत्वादाकाशत्वं नाम सामान्यमाकाशे न विद्यते सामान्यस्यानेकवृत्ति रा म॰
त्वात्। विभु चाकाशं। परममहत्परिमाणवदित्यर्थः। सर्वत्र कार्योपलब्धेः। अत एव विभुत्वान्नित्यत्वमिति। कालो हि २२

।विपरांतपरमापरत्वम्‌ मेवाः। संख्यापरिमाणपृथक्त्वसंयोगविभागगुणाः एकः। नित्यो वि[illegible]। कथमस्य दिग्विप
रीतपरत्वापरत्वानुमेयत्वं। उच्यते। सन्निहिते द्रष्टे संनिधानात् परत्वं हि विपरीतं परत्वं प्रतीयते। व्यवहिते पुनर्वा
तस्परत्वा हैं विपरीतमपरत्वमपरत्वं प्रतीयते। तद्दिग्दिविपरीतं परत्वं अपरत्वं च कार्यं। तत्कारणस्य दिगादेरसंभ
वात्। कालमेव कारणमनुमापयति। स चैको वर्त्तमानातीतभविष्यत्क्रियोपाधिवशात् वर्त्तमानादिव्यपदेशं लभते।
पुरुष इव पचनाधिक्रियोपाधिवशात्पाचकादिव्यपदेशं लभते। नित्यत्व विभुत्वे च पूर्ववत्। दिगेका नित्या विभ्वी च।
संख्यापरिमाणपृथक्त्वसंयोगविभागवती। पूर्वापरादिप्रत्ययैरनुमीयते। तेषामन्यानिमित्तानां संभवात्। पूर्वस्मिन्न
द्रिमेव। वस्तुनस्त्याद[illegible] स्यात्। सापैकापि सवितुस्तत्तद्देशसंयोगोपाधिवशात्प्राच्यादिसंज्ञां लभते। आत्मत्व
सामान्यवानात्मा। सुखदुःखवैचित्र्यान्यथानुपपत्तेः सर्वोऽप्येव। तस्य गुणाः [illegible] संख्यादयः संच। बुद्ध्यादयो नव। नित्यत्व

र॰भा॰ विभुत्वेचपूर्ववत्।मनस्त्वाभिसंबंधवन्मनः।अणुसंयोगिवा।अंतरिंद्रियंसुखाद्युपलब्धिकारणं।नित्यंसंख्यागुण
२२ वत्।संयोगेनवात्येंद्रियैरर्थग्राहकं।अतएवसर्वोपलब्धिसाधनंनप्रत्यक्षं।अपितुअनुमानगम्यं।तथाहिसुखा
द्युपलब्धयःचक्षुराद्यतिरिक्तकरणसाध्याः।असत्स्वपिचक्षुरादिषुजायमानत्वात्।छिदिक्रियावत्।यत्तत्करणं
तन्मनः।तच्चाणुपरिमाणं।द्रव्याश्रयानिगुणांश्चष्टे।सामान्यवान्असमवायिकारणमस्पंदात्मागुणः।सचद्रव्या रा॰
प श्रितश्चरूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदु
ःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदाच्चतुर्विंशतिर्गुणाः।तत्ररूपंचक्षुर्मात्रग्राह्योविशेषगुणः।पृथिव्यादित्र
यवृत्ति।तच्चशुक्लाद्यनेकप्रकारं।पाकजंपृथिव्यामेव।तच्चानित्यंपृथिवीमात्रगतं।।आप्यतैजसपरमाणौनित्यंपृथि राम॰
वीमात्रगतं।।आप्यतैजसपरमाणौनित्यं।आप्यतैजसपरमाणौनित्यं।आप्यतैजसकार्येष्वनित्यं।शुक्लमभास्वरम २३

पाकजं मन्त्राभा॰ = रं। रसः रसनेन्द्रियग्राह्यो विशेषगुणः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां मधुरादिषट्प्रकारः। पा
कजश्च। अप्सु मधुरोऽपाकजश्च। नित्योऽनित्यश्चेति। नित्यः परमाणुरूपास्वप्सु। कार्यरूपासु अनित्यः। गंधो घ्राणग्रा
ह्यो विशेषगुणः पृथिवीमात्रवृत्तिः। स च द्विविधः। सुरभिरसुरभिश्चेति। जलादौ तु गंधप्रतिभानं संयुक्तसमवायेन द्रष्टव्यं।
स चानित्यो भूमात्रे। स्पर्शस्त्वगिंद्रियमात्रग्राह्यो विशेषगुणः पृथिव्यादिचतुष्टयवृत्तिः। स च त्रिविधः। शीतोष्णानुष्णाशी
तस्पर्शभेदात्। शीतः पयसि। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः। पृथिवीमात्रेऽनित्यः। आप्यतैजसवायवीयप
रमाणुषु नित्यः। आप्यादिकार्येषु त्रिषु अनित्यः। एते च रूपादयश्चत्वारो महत्कार्यसमवेतत्वे सति उद्भूताः प्रत्यक्षा
ः। संख्या एकत्वादिव्यवहारहेतुः। सामान्यगुणः। सा एकत्वादिपरार्द्धपर्यंता। संख्या द्विविधा। एकाश्रिताऽनेकाश्रिता
च। तत्रैकत्वं द्विविधं नित्याऽनित्यभेदात्। नित्यगतं नित्यं। अनित्यगतं = । स्वसमवायिकारणगतैकत्वजन्यं। द्वित्वं चानित्य

त०भा० समवात [illegible] योः पिंडयोरिहमेकमिहमेकमित्यपेक्षाबुद्ध्या जन्यते। तत्र पिंडौ द्वौ समवायिकारणं। पिंडयोरेकत्वे समवायि
२४ कारणे। अपेक्षाबुद्धिः निमित्तकारणं। अपेक्षाबुद्धिनाशाद्द्वित्वनाशः। एवं त्रित्वाद्युत्पत्तिर्विज्ञेया। विनाशजं परिमाणं
मानव्यवहारासाधारणं कारणं। तच्चतुर्विधं। अणु महद्दीर्घं ह्रस्वं चेति। तत्र कार्यपरिमाणं संख्यापरिमाणप्रचय
योनि। तथाहि। द्व्यणुकपरिमाणं ईश्वरापेक्षा[illegible]द्वित्वजन्यपरमाणुद्वित्वजनितत्वात्संख्या[illegible]नि। संख्याकारणमित्यर्थ
ः। त्र्यणुकपरिमाणं च स्वाश्रयसमवायि[illegible]गतबहुत्वसंख्यायोनि। चतुरणुकपरिमाणं च स्वाश्रयसमवायिका
रणपरिमाणजन्यं। तूलपिंडपरिमाणं तु प्रचययोनि। प्रचयश्च स्वाश्रयसमवायिकारणावयवानां प्रशिथिलसंयो
गजः। परमाणुपरिमाणं परममहत्परिमाणं चाकाशादिगतं नित्यमेव। पृथक्त्वं पृथग्व्यवहारासाधारणं कारणं। राम०
तच्च द्विविधं एकपृथक्त्वं द्विपृथक्त्वादिकं चेति। तत्राद्यं नित्यगतं नित्यमेव। अनित्यगतं द्विपृथक्त्वादिकम् अनित्यमेव। सं २४

योगः संयुक्तव्यवहारहेतुः। द्व्याश्रयः अव्याप्यवृत्तिश्च। स च त्रिविधः। अन्यतरकर्मज उभयकर्मजः संयोगजश्चेति।
तत्रान्यतरकर्मजो यथा। क्रियावता श्येनेन निःक्रियस्य स्थाणोः संयोगः। तस्य श्येनक्रियाऽसमवायिकारणं। उभय
कर्मजो यथा। तक्रिययोर्मेषयोः संयोगः। तृतीयो यथा। कारणाकारणसंयोगात्कार्याकार्यसंयोगः। यथा हस्ततरु
संयोगेन कायतरुसंयोगः। विभागोऽपि विभक्तप्रत्ययहेतुः। संयोगपूर्वको द्व्याश्रयः। स च त्रिविधः। अन्यतरकर्मज
उभयकर्मजो विभागजश्चेति। तत्र प्रथमो यथा। शैलश्येनक्रियया शैलश्येनविभागः। द्वितीयो यथा। मल्ल
योर्मल्लयोर्विभागः। तृतीयो यथा। हस्ततरुविभागात्कायतरुविभागः। परत्वापरत्वे परापरव्यवहारसाधारणकारणे
ते तु द्विविधे। कालकृते दिक्कृते च। तत्र दिक्कृतयोरुत्पत्तिः कथ्यते। एकस्यां दिशि अवस्थितयोः पिंडयोः इद
मस्मात्सन्निकृष्टमितिबुद्ध्यानुगृहीतेन दिक्पिंडसंयोगेनापरत्वं सन्निकृष्टे जन्यते। विप्रकृष्टबुद्ध्या तु परत्वं विप्रकृष्टे

त॰ भा॰ उत्पन्ने तावत्सन्निकर्षस्य पिंडस्य द्रष्टुः ... पासंयुक्तसंयोगाल्पीयस्त्वं। तद्भूयस्त्वं विप्रकृष्टत्वं। कालकृतयोस्तु पर
२५ त्वापरत्वयोरुत्पत्तिः कथ्यते। अनियतदिगवस्थितयोर्युवस्थविरपिंडयोर्यस्मादल्पतरकालसंबंध इत्यपेक्षाबुद्ध्यानु
गृहीतेन कालपिंडसंयोगेनास्य परत्वं। अयमस्मादल्पतरकालसंबंध इति बुद्ध्यानुगृहीतेन कालपिंडसंयोगेनास्य वि
परत्वं। गुरुत्वमाद्यपतनासमवायिकारणं। पृथिवीजलवृत्ति। यथोक्तं। संयोगवेगप्रयत्नाभावे सति गुरुत्वात्पत
नमिति। द्रवत्वमाद्यस्पंदनासमवायिकारणं। भूतेजोजलवृत्ति। भूतेजसोर्घृतादिसुवर्णयोरग्निसंयोगेन द्रवत्वं
नैमित्तिकं। द्रवत्वं जले नैसर्गिकं। स्नेहः चिक्कणता जलमात्रवृत्तिः। कारणगुणपूर्वको गुरुत्वादिवत्पाकद्रव्यभा
वी शब्दः श्रोत्रग्राह्यो गुणः। आकाशस्य विशेषगुणः। ननु कथमसन्निकृष्टस्य ग्रहणं। यतो भेर्यादिदेशे शब्दो जा राम॰
यते। श्रोत्रं तु पुरुषदेशे स्थितं। सत्यं। भेरीदेशे जातः शब्दो वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वास्वसंनिहितं श २५
अस्व

[illegible] श्वेतानव घोनापिमध्यमः। [illegible] उत्पा [illegible] मानेदलद्वयविभा
गदेशेजातःशद्वःशद्वांतरारंभेणश्रोत्रदेशेसमशद्वंजनयति।सोत्पशद्वःश्रोत्रेणगृह्यते।नत्वाद्योनमध्यमः।भेरी
शद्वोमयाश्रुतइतिधीरश्रोत्रेगमेरीशद्वोत्पत्तौभेर्याकाशसंयोगोऽसमवायिकारणं।भेरीदंडसंयोगोनिमित्तका
रणं।एवंवेश[illegible]पाटनाद्युत्पत्वटाशद्वोत्पत्तौवंशदलाकाशविभागोऽसमवायिकारणं।दलद्वयविभागोनिमित्तका
रणं।इत्यमाद्यःशद्वोसंयोगजोविभागजोनिमित्तकारणं।इत्यमाद्यःशद्वोसंयोगजोविभागजोवा।अंत्यमध्यमश
द्वानांतुशद्वोऽसमवायिकारणं।अंत्यकुलवातोनिमित्तकारणं।[illegible]गाद्विभागाच्छद्वाच्चशद्वनिष्पत्तिरि
ति।आद्यादीनांसर्वशद्वानाम[illegible]वसमवायिकारणं।कर्मबुद्धिवत्त्रिक्षणमात्रास्थायिनः।तत्राद्यमध्यमश
द्वाःकार्यशद्वनाश्याः।अंत्यस्तूपांत्येनउपांत्यस्त्वंत्येनसुंदोपसुंदन्याय॰।द्वितीयक्षणा[illegible]गिनोत्पत्तौक्षणेवास

येनना[illegible]ते।।इदंलघु[illegible]।उपांत्येनेति[illegible]स्याधिनाल्लस्य

त॰ भा॰
२६

गोत्पन्नाशजनकासंभवात्। तस्माद् उत्पन्नाशात् विनाशित्वं शब्दस्यानुमानात्। तथा हि। अनित्यः शब्दः
:सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वात्। घटवत्। न त्वश्य : स्यानित्यत्वं साध्यं। अनित्यत्वं च विनाशा
वच्छिन्नस्वरूपत्वमेव। न तु विनाशावच्छिन्नसत्तायोगः। प्रागभावे सत्ताहीने अनित्यत्वासंभवात्। सामान्यवत्त्वे सत्य
स्मदादिबाह्येन्द्रियप्रत्यक्षत्वं हेतुः। इन्द्रियप्रत्यक्षत्वादित्युच्यमाने आत्मनि व्यभिचारः स्यादित्यत उक्तं बाह्येन्द्रिये
ति। एवमपि ते नैव योगिनां बाह्येन्द्रियग्राह्येण व्यभिचारः स्यादित्यतो योगीन्द्रियनिरासार्थं अस्मदादीति। किं
पुनर्योगिसद्भावे प्रमाणं। उच्यते। परमाणवः कस्यचित्प्रत्यक्षाः। प्रमेयत्वात् घटवदिति। परमाणवः यस्य
प्रत्यक्षाः स एव योगी। तथा सामान्यादिना व्यभिचारः स्यादित्यत उक्तं सामान्यवत्त्वे सतीति। सामान्यादित्रयं राम॰
तु निःसामान्यं। अथार्थप्रकाशो बुद्धिः। प्रीतिः सुखं। तच्च सर्वात्मनां ऽनुकूलवेदनीयं। पीडा दुःखं। तच्च सर्वात्मनां प्र २६

तिकूलतयावेदनीयं।रागइच्छा।क्रोधोद्वेषः।उत्साहःप्रयत्नः।बुद्ध्यादयःषण्मानसप्रत्यक्षाः।धर्माधर्मौसुखदुःख
२२ योरसाधारणकारणे।तौचाप्रत्यक्षावप्यागमगम्यावनुमीयते।तथाहि।देवदत्तस्यशरीरादिकंदेवदत्तविशेषगुण
जन्यं।कार्यत्वेसतिदेवदत्तस्यभोगहेतुत्वात्।देवदत्तप्रयत्नजन्यवस्तुवदिति।यश्चशरीरादिजनकआत्म
४ गुणः।सएवधर्मोधर्मश्च।प्रयत्नादीनांजनकत्वादिति।संस्कारस्त्रिविधः।वेगोभावनास्थितस्थापकश्चेति।
तत्रवेगःपृथिव्यादिचतुष्टयमनोवृत्तिः।सचक्रियाहेतुः।भावनाख्यस्तु संस्कारआत्ममात्रवृत्तिरनुभव जन्य ज५
स्मृतिहेतुः।सचोद्बुद्धएवस्मृतिंजनयति।उद्बोधश्चसहकारिलाभः।सहकारिणश्चसंस्कारस्यसदृशदर्शनादय
ः।यथोक्तं।सदृशादृष्टचिंताद्याःस्मृतिबीजस्यबोधकाइति।स्थितस्थापकस्तुस्पर्शवद्विशेषवृत्तिः।अन्यथा कृत२
भूतस्यस्वाश्रयस्यधनुरादेःपुनस्तादवस्थ्यापादकः।एतेबुद्ध्यादयोऽष्टौधर्मान्ताभावनाचात्मविशेषगुणाः।
धर्मा

त॰भा॰ वंगुणाः॥ इदानीं क[illegible]ते। चलनात्मकं कर्म। गुणवद्द्रव्यमात्रवृत्ति। अविभुद्रव्यपरिमाणेन मूर्तत्वापरनाम्ना सम
२७ वैकार्थसमवेतं। विभागद्वारा पूर्वदेशसंयोगनाशे सत्युत्तरसंयोगहेतुश्च। तच्चोत्क्षेपणापक्षेपणाकुंचन
प्रसारणगमनभेदात्पंचविधं। भ्रमणरेचनस्पंदनादीनि गमनग्रहणेनैव गृह्यन्ते। अनुवृत्तिप्रत्ययहेतुः सामान्यं। द्रव्यादित्रि
तर्कभा॰ वृत्ति। नित्यमनेकानुगतं। तच्च द्विविधं। परमपरं च। परं सत्ता बहुविषयत्वात्। सा चानुवृत्तिमात्रहेतुत्वात्सा
मान्यमात्रं। अपरं द्रव्यत्वादि। अल्पविषयत्वात्। तच्च व्यावृत्तेरपि हेतुत्वात्सामान्यविशेषः। अत्र कश्चिदाह।
व्यक्तिरिक्तं सामान्यं नास्तीति। अत्र ब्रूमः। किमालंबना तर्हि भिन्नेषु विलक्षणेष्वनेकेषु पिंडेषु एकाकारा
बुद्धिर्विनानुगतमेकं। नैव सामान्यमिति। ननु तस्यातद्व्यावृत्तिविषय[illegible]वोपपत्तेः कामारः प्रसपानेकेषु गो रा॥०
पिंडेषु। नत्वविधिरूपगोत्वसामान्यविषयः। मैवं। विधिमुखेनैवैकाकारग्रहणात्। विशेषो नित्यद्रव्यवृत्तिः॥ मा २७ स्व१

कुतो ऐक्याकारानुवृत्तः [illegible] व्यावृत्ति। सर्वेष्वेव गोपिंडेष्वगोव्या
[illegible] व्यावृत्तिरस्तीति नागोव्या[illegible]२

...वयवा...वि ताव ... ताः संबंधः समवायः ... न चैतद्... अ२

संबंधः

द्वित्वबुद्धिमात्रहेतुः। नित्यद्रव्याणि गगनादिपंचकं पृथिव्यादयश्चत्वारः परमाणुरूपाः। अयुतसिद्धयोः सम
वायः। स चोक्त एव। नन्ववयवातिरि[illegible]स्यावयविनोऽभावात्। परमाणवो हि तथा सन्निकृष्टा बहवो घटपंच
रोपमिति बुद्ध्या गृह्यन्ते। अत्रोच्यते। अस्येक[illegible]लात् घट इति प्रत्यक्षा बुद्धिः। न चेमा परमाणुष्वनेकेष्वस्थूलेषु
मध्ये अतीन्द्रियेषु भवितुमर्हति। भ्रांतेयं बुद्धिरिति चेन्न बाधकाभावात्। तदेवं षट्पदार्थाः द्रव्यादयो वर्णिताः। ते च वि
धिमुखप्रत्ययवेद्यत्वाद्भावरूपा एव। इदानीं निषेध[illegible]खप्रमाणगम्योऽभावरूपः सप्तमः पदार्थः प्रतिपाद्य
ते। स चाभावः संक्षेपतो द्विविधः। संसर्गाभावोऽन्योन्याभावश्च। संसर्गाभावोऽपि त्रिविधः। प्रागभावप्रध्वंसाभावो
सं[illegible]त्यंताभावश्च। उत्पत्तेः प्राक् कारणे कार्यस्याभावः प्रागभावः। यथा तंतुषु पटाभावः। स चानादिरुत्प
त्तेरभाववति विनाशी च। कार्यस्यैव तद्विनाशरूपत्वात्। उत्पन्नस्य कारणेऽभावः प्रध्वंसाभावः विनाश इति पा

त॰भा॰ वत्। यथा भग्ने घटे कपालमालायां घटाभावः। स च पुनः प्रहारादिजन्यः। चोत्पन्नविनाशी। न तु पुन
२८ पुनरनुत्पन्नः। त्रैकालिकोऽभावोऽत्यन्ताभावः। यथा वायौ रूपाभावः। अन्योन्याभावस्तादात्म्यप्रतियोगिको
नश्वर ऽभावः। घटः पटो न भवतीति। एवमर्थाः व्याख्याताः। ननु ज्ञानानां ब्रह्मगोचरत्वातिरिक्ता अर्था न सन्तीति। मैवं अर्थान
मपि प्रत्यक्षसिद्धत्वेनाशक्यापलापत्वात्। बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायैरभिधीयते सा बुद्धिः। अर्थ
प्रकाशो बुद्धिः। सा च संक्षेपतो द्विविधा। अनुभवः स्मरणं च। अनुभवोऽपि द्विविधः। यथार्थोऽयथार्थश्च। तत्र य
थार्थोऽविसंवादी। स च प्रत्यक्षादिप्रमाणैर्जन्यते। यथा चक्षुरादिभिरदुष्टैर्घटादिज्ञानं। धूमलिंगकमग्नि
ज्ञानं। गोसादृश्यदर्शनाद्गवयशब्दवाच्यताज्ञानं। ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यात् ज्योतिष्टोम राम॰
स्य स्वर्गसाधनत्वज्ञानं वा। अयथार्थस्तु स्वार्थव्यभिचारी। अप्रमा॥ ॥ स त्रिविधः। संशयस्तर्को विपर्यय २८

स्यासंशयात्मकोऽव ‑नेतो। विपर्ययस्त्वतस्मिंस्तद्ग्रहणं भ्रम इति यावत्। यथा॥ रावत्रिनिश्च रजते शुक्तिकाहे रज
तरूपग्रहः। इदं रजतमिति। स्मरणमपि यथा॥ मयथार्थं चेति द्विविधं। तदुभयं जागरे। स्वप्ने तु ‑ सर्वं ज्ञानं स्म
रणमेवा यथार्थं च। दोषवशेन त‑ हितिस्थाने इदमित्युपा‑ । सर्वं च ज्ञानं निराकारमेव। ननु ज्ञाने अर्थस्य
स्याकारोऽनुभूयते। साकारज्ञानवादिनिराकरणात्। अत एवाकारेणार्थानुमानमपि निरस्तं प्रत्यक्षसिद्धत्वात्। न
बुद्धेः सर्वं ज्ञानमर्थनिरूप्यं। अर्थप्रतिबद्धस्यैव तस्य‑मानिरूपणात्। घटज्ञानवानहमिति। ननु
ज्ञानवानहमित्येव ‑वकाशं जायते। अंतरिंद्रियं मनः तदेवोक्तमेव। प्रवृत्तिः धर्माधर्ममयी अदृष्टैर्जगद्व्यवहा
रसाधकत्वात्। दोषा रागद्वेषमोहाः। रागेच्छा। द्वेषो मन्युः। क्रोध इति ‑ । मोहो मिथ्याज्ञानं विपर्यय इ
ति यावत्। पुनरुत्पत्तिः प्रेत्यभावः। स चात्मनः पूर्वदेहनिवृत्तिः अपूर्वदेहसंघातलाभः। फलं पुनर्भोगः। भोगः

त॰भा॰ सुखदुःखानुभवः। पीडा दुःखं। तच्चोक्तमेव। मोक्षोपवर्गः। स चैकविंशतिप्रभेदभिन्नस्य दुःखस्यात्यन्तिकी निवृत्तिः। एकवि
२९ शतिभेदास्तु। शरीरं षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति। गौणमुख्यभेदात्। सुखमपि दुःखा
नुषंगाद्दुःखं। अनुषंगोविनाभावः। स चायमुपचारो मधुनि विषसंपृक्ते मधुनोपि विषपक्षनिक्षेपवत्।
स पुनरपवर्गः कथं। उच्यते। शास्त्राद्विदितपदार्थतत्त्वस्य विषयदोषदर्शनेन विरक्तस्य मुमुक्षोर्ध्यायि
नो ध्यानपरिपाकवशात्साक्षात्कृतात्मनः क्लेशहीनस्य निष्कामकर्मानुष्ठानात्। अनागतधर्माधर्मावनार्ज
यतः। पूर्वोपात्तधर्माधर्मप्रचयं योगर्द्धिप्रभावाद्विदित्वा समाहृत्य भुंजानस्य पूर्वकर्मनिवृत्तौ वर्त्तमानशरीरा
पगमे अपूर्वशरीराभावात्। शरीराद्येकविंशतिभेदं दुःखं न भवति। कारणाभावात्। सोयमेकविंशतिप्रभेददु रा॰म॰
ःखहानिर्मोक्षः। अपवर्ग इति। इदानीं संशयमाह। एकस्मिन्धर्मिणि विरुद्धनानार्थावमर्शः संशयः। स त्रिविधः। २९

समानधर्मदर्शनजो। [illegible] विप्रतिपत्तिजोऽसाधारणधर्मजश्चेति। तत्रैको [illegible] शे [illegible] दर्शनत्वमिति समान
धर्मदर्शनजः। यथा स्थाणुर्वा पुरुषो वेति। एकस्मिन्नेव हि पुरोवर्त्तिनि द्रव्ये स्थाणुत्वनिश्चायकं वक्रकोटरा
दिमत्त्वं पुरुषत्वनिश्चायकं शिरःपाण्यादिकं विशेषमपश्यतः स्थाणुपुरुषयोः समानधर्ममूर्ध्वत्वादिल
क्षणं च पश्यतः पुरुषस्य भवति संशयः। किमयं स्थाणुः स्यात्पुरुषो वेति। द्वितीयस्तु संशयो विशेषादर्शने स
ति विप्रतिपत्तिजः। यथा किमयं शब्दो नित्य उतानित्य इति। तथा हि। एके ब्रुवते शब्दो नित्यः अपरे ब्रुवते शब्दोऽनि
त्य इति। तयोर्विप्रतिपत्त्या मध्यस्थस्य पुंसो विशेषमपश्यतो भवति संशयः। किमयं शब्दो नित्य उत वाऽनित्य
इति। असाधारणधर्मजस्तु संशयो यथा। नित्यादनित्याच्च व्यावृत्तेन भूमात्रसाधारणेन गन्धवत्त्वेन विशेष
मपश्यतो भुवि नित्यत्वानित्यत्वसंशयः। तथा हि। उत सकलनित्यव्यावृत्तेन गन्धवत्त्वेन य गाद्भूमिः किमनित्या।

यथा धूमवत्त्वस्य हेतोर्महानसवत् [illegible] यथा

यों २

त॰ दी॰ उत्पन्नकृत्यानि। [illegible] योगा [illegible] संशयः। येन प्रयुक्तः [illegible] तेन त्वयोजनं। तच्च सुखदुःखा
३० वाप्तिहानी। तदर्था हि प्रवृत्तिः सर्वस्य। वादिप्रतिवादिनोः संप्रतिपत्ति। विषयो [illegible] ष्टांतः। स च द्विविधः। एकः साध
र्म्यदृष्टांतः। तस्यैव हेतोर्महानसः। आभाणिकत्वेनाभ्युपगतोर्थः सिद्धांतः। स चतुर्द्धा। सर्वतंत्रप्रतितंत्राधिकरणा
भ्युपगमसिद्धांतभेदात्। सर्वतंत्रसिद्धांतो यथा। धर्मिमात्रसद्भावः। द्वितीयो यथा। नैयायिकस्य मनइंद्रियं तद्धि त
मानतंत्रे वैशेषिके सिद्धं। तृतीयो यथा। क्षित्यादिकर्तृसिद्धौ कर्तुः सर्वज्ञत्वं। चतुर्थो यथा। जैमिनीयकस्य नित्या
नित्यत्वविचारे यथा तथास्तु तावच्छब्दो गुण इति। अनुमानस्यैकदेशा अवयवाः। ते च प्रतिज्ञादयः पंच। तथा
च न्यायसूत्रे। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा इति। तत्र साध्यधर्मविशिष्टधर्मिप्रतिपादकं राम॰
वचनं प्रतिज्ञा। यथा पर्वतो वह्निमानिति। पंचम्यंतं लिंगप्र॰ पादकं वचनं हेतुः। यथा धूमवत्त्वादिति। सख्यो ३०

[illegible] बांतवा। वाक्य २

।निकेदृष्टान्तवचनम् ।हरणं।यथा यो धूमवान् [illegible] ।यथा महानसः।पक्षे लिंगोपसंहा [illegible] तुपनयः।य
था धूमवांश्चायमिति।पक्षे साध्योपसंहारो निगमनं।यथा तस्मादग्निमानिति।तस्मात्तथेति॥एते च प्रति॥दय
:पंचानुमानवाक्यस्यावयवाः।तन्तु समवायिकारणं।शब्दस्याकाशसमवेतत्वात्।तर्कोनिष्टप्रसंगः।व्याप्या
रोपेण व्यापकारोपप्रसंगः।स च सिद्धव्याप्तिकयोर्धर्मयोर्व्याप्यांगीकारेण व्यापकप्रसंजनं।यथा यद्यत्र घटोऽभ
विष्यत्तर्हि भूतलमिवाद्रक्ष्यत।स्व एव तर्कः प्रमाणानामनुग्राहकः।तथा हि।अयं पर्वतः सा [illegible] हुतावानग्निरि
ति संदेहानन्तरं यदि कश्चिन्मन्येतानग्निरयमिति तदा तं प्रतिपद्य यद्ययमनग्निरभविष्यत्तदनग्निमत्त्वादधूमोप्यभवि
ष्यदिति।अधूमवत्त्वप्रसंजनेन क्रियते।स एव प्रसंगस्तर्क उच्यते।अयं च प्रवर्तमानस्य धूमलिंगकस्यानु
मानस्य विषयमग्निमनुप्रापयति।अनग्निमत्त्वप्रतिक्षेपात्।अतोनुमानस्यानुग्राहक इति।ऽवकश्चि

त॰भा॰ ३१ दाहा तर्कः संशयेन भवतीति। तत्रा एककोटिविषयत्वात्तर्कस्य। निर्णयोवधारणज्ञानं। ... प्रमाणफलं। तत्वबुभु
त्सोः कथा वादः। स्वाष्टनिग्रहस्थानमधिकरणं। ते च न्यूनाधिकापसिद्धांता हेत्वाभासपंचकं चेत्यष्टौ निग्रहाः। उभयसा
धनवती विजिगीषुकथा जल्पः। स च यथासंभवं सर्वनिग्रहस्थानमधिकरणं। परपक्षे दूषिते स्वपक्षस्था
पनप्रयोगावसानश्च। स्वपक्षस्थापनाहीना वितंडा। परपक्षदूषणमात्रावसाना। नास्य वैतंडिकस्य स्था
प्यः पक्षोस्ति। कथा तु नानावक्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसंदर्भः। असिद्धानां पक्षधर्मत्वादिरूपाणां म
ध्ये एकेनापि रूपेण हीना अहेतवः। तेपि कतिपयरूपयोगाद्धेतुवदवभासमाना हेत्वाभासाः। तेचासिद्धवि
रुद्धानैकांतिकप्रकरणसमकालात्ययापदिष्टभेदात्पंचैव। अत्रोदयनेनाश्रयस्य पक्षधर्मतयाप्रतीतिः सिद्धि राम॰
स्तदभावोऽसिद्धिरित्यसिद्धिलक्षणं कृतं। तच्चपक्षधर्मत्वविरहादिष्वपि संभवतीति सांकर्यं प्रतीपन्ने। तथापिव ३१

थानसांकर्यंतयोरव्यतोपोऽन्यत्रसाध्यदेवृद्धपारस्परतिरेकःमर्थस्यदुष्टत्वप्रयोजनत्व दुष्टत्वमिकरणोद्भवाणमिति
व्यावृत्त।नान्यः।तेनैवपुरःस्फूर्त्तिकेनदुष्टौज्ञापितायां॰ थापर्यवसानेज्ञातेतदुपज्ञ।विनोऽन्यास्यानुपयोगा
त्।तथाचसतियत्रसाध्यविपर्ययव्याप्तोदुष्टत्वमिकारणंसएवविरुद्धोहेत्वाभासः।एवंयत्रव्यभिचारस्य
स्तथाभूतास्तेनैकांतिकाः।यःपुनर्व्याप्तिपक्षधर्मताविशिष्टहेतुस्वरूपज्ञप्त्यभावेनदुष्टास्तेअसिद्धाः।।
दुष्टत्वमिकारकाइतियावत्।तथाभूतश्चासिद्धस्त्रिविधः।आश्रयासिद्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदात्
।तत्रयस्यहेतोराश्रयोनावगम्यतेसआश्रयासिद्धः।यथागगनारविंदंसुरभिअरविंदत्वात्सरोजारविंदव
त्।अत्रहिगगनारविंदमाश्रयः।सचनास्त्येव।अयमप्याश्रयासिद्धः।तथाहि।घटेऽनित्यः।कार्यत्वात्।प
टवत्।ननुआश्रयस्यासत्वात्।कार्यत्वादितिहेतुर्नापिनाश्रयासिद्धः।किंतुसाधनस्यासात्।सिद्धस्यव्यापि

त० भा० ते त्वस्य साधनात्। नैषां न हि तत्स्वरूपेण क... योऽनवगतप्रमाणस्यासिद्धिः संदिग्धत्वेन ना... पलब्धेः। येऽनिश्चि
३२ णाते थेन्यापायः प्रवर्त्तते। अपि तु संदिग्धेऽर्थे। न च घटेऽनित्यत्वसंदेहोस्ति। अनित्यत्वस्य निश्चितत्वात्। तेन प
क्षोपि स्वरूपेण घटोस्ति तथाप्यनित्यत्वसंदेहाभावात् नासावाश्रयः इत्याश्रयासिद्धत्वादहेतुः। स्वरूपा
सिद्धमुच्यते। यो हेतुराश्रये नावगम्यते स स्वरूपासिद्धः। यथा सामान्यं नित्यं कृतकत्वात्। इति कृतकत्वं हेतु
राश्रये सामान्ये नास्त्येव। भागासिद्धोपि स्वरूपासिद्ध एव। यथा पृथिव्याद्याश्चत्वारः परमाणवः नित्या गो
धवत्वादिति। गंधवत्वं पक्षीकृतेषु सर्वेषु नास्ति। पृथिवीमात्रवृत्तित्वात्। अत एव भागासिद्धः स्वरूपासिद्धो। तथा विशे
षणासिद्ध विशेष्यासिद्धासमर्थविशेषणासिद्धासमर्थविशेष्यासिद्धादयः स्वरूपासिद्धभेदाः। तत्र विशे राम
षणासिद्धो यथा। शब्दः अनित्यः द्रव्यत्वे सति अस्पर्शवत्वात्। अत्र द्रव्यत्वविशिष्टमस्पर्शवत्वं हेतुः। नास्पर्श ३२

वत्वमा[...]। शब्दः द्रव्यत्वं नास्ति गुणत्वात्। अतो विशेषणा[सि]द्धः। न च असति विशेषणे द्रव्यत्वेन। [वि]शिष्ट
स्पर्शवत्त्वमस्ति विशेषणाभावे विशिष्टरूपस्याभावः। तेन सत्यप्यस्पर्शवत्त्वे विशिष्टहेतोरभावात्स्व
रूपासिद्धत्वं। विशेष्यासिद्धो यथा। शब्दः नित्यः अस्पर्शवत्त्वे सति द्रव्यत्वात्। अत्रापि विशिष्टहेतुः ब
च विशेष्याभावे विशिष्टं स्वरूपं नास्ति। हि विशिष्टहेतुरपि नास्त्येव। असमर्थविशेषणविशेष्यो यथा। शब्दो
नित्यो गुणत्वे सति अ[का]रणत्वात्। अत्र विशेषणस्य न किंचित्सामर्थ्यमस्ति विशेष्यस्य कारणत्वस्यैव नि
त्यत्वसाधने सामर्थ्यात्। तद[स]मर्थविशेषणः। अतो असमर्थविशेषणासिद्धः। स्वरूपासिद्ध एव। विशे[...]ण
भावे विशिष्टस्याभावात्। ननु विशेषणं गुणत्वं तच्च शब्देऽस्त्येव। तत्कथं विशेषणाभावः। सत्यं। अस्त्येव
गुणत्वं न तु विशेषणं। तेन हि हेतो विशेष[...] यस्य वक्ष्ये हेतुप्रयोजनवत्। गुणत्वं तु निःप्रयोजनं समर्थ

त॰भा॰ मिरूकमेवाऽसमर्थविशेषणाय था। तत्रैव तदधत्पयेनऽ। गोशब्दो नित्यः अकारत्वे सति गुणत्वात्। अत्र
३३ नुमानस्यैव नित्यत्वसाधने समर्थत्वात्। विशेष्यमसम। स्वरूपासिद्धस्तु विशेष्याभावे पि विशिष्टाभा
वात्। विशिष्टस्य हेतुत्वेनोपादानात्। शेषं पूर्ववत्। व्याप्यत्वासिद्धस्तु स एव यस्य हेतोर्व्याप्तिर्नोपलभ्यते। स द्वि न्न२
विधः। एकः साध्येनासहचरितः। अपरस्तु सोपाधिकसाध्यसंबंधः। तत्र प्रथमो यथा। यत्सत् तत्क्षणिकं। यथा
जलधरः। संश्च विवादास्पदीभूतशब्दादिरिति। अत्र शब्दादिः पक्षः। तस्य क्षणिकत्वं साध्यं। सत्त्वं हेतुः। न
हेतोः चास्य क्षणिकत्वेन व्याप्तौ प्रम[redacted]णमस्ति। उद्धतीमुपाधिसहितो व्याप्यत्वासिद्धः। यथा स श्यामो मैत्री तद्य धा २
तनयः मैत्रीतनयत्वात्। परिदृश्यमानमैत्रीतनयस्तोमवत्। मैत्रीतनयत्वेन श्यामत्वे साध्ये। न च मैत्रीतनयत्वं श्या रामं॰
मत्वे प्रयोजकं। किंतु शाकाद्याहारपरिणामभेद एव। प्रयोजकश्चोपाधिरुच्यते। ततो मैत्रीतनयत्वस्य श्याम ३३

त्वप्रयोजकं। किंतु शाकाद्याहारपरि[illegible]दी। अन्यतस्पश्य
मैत्रेन संबंधे शाकाद्यन्नपरिणाम उपाधिः। यथाग्ने धूमसंबंधे आर्द्रेन्धनसंयोगः। अत्रोपाधिसंबंधाद्व्याप्ति
र्नास्ति। अतो व्याप्यत्वासिद्धो यं हेतुर्मैत्रीतनयत्वादिः। तथाऽपरोऽपि व्याप्यत्वासिद्धः। यथा क्रत्वंतर्वर्तिनी हिं
साऽधर्मसाधनं हिंसात्वात्। क्रतुबाह्यहिंसावत्। न च हिंसात्वमधर्मसाधने प्रयोजकं। किंतु निषिद्धत्वं उपा
धिरिति पूर्ववदुपाधिसद्भावात्। व्याप्यत्वासिद्धो यं हिंसात्वं हेतुः। ननु साधनाव्यापकत्वे सति साध्यव्यापको
यः स उपाधिरित्युपाधिलक्षणं। तच्च निषिद्धत्वे नास्ति तत्कथं निषिद्धत्वमुपाधिरिति। मैवं। निषिद्धत्वेप्यु
पाधिलक्षणस्य सत्वात्। तथा हि। साध्यसाधर्मसाधनत्वस्य व्यापकं निषिद्धत्वं। यत्र यत्राधर्मसाधनत्वं।।
तत्र तत्रावश्यं निषिद्धत्वस्य सत्वात्। न च यत्र हिंसात्वं तत्र तत्र निषिद्धत्वं। क्रत्वंगहिंसायां व्यभिचारात्।।

अत्र हि कृत्वं गृहिंसायां [illegible] । ननु निषेद्धत्वमिति । तदेवं त्रिविधोऽसिद्धो दर्शितः । सेच ते विरुद्धः क
थ्यते । साध्यविपर्ययव्याप्तो हेतुर्विरुद्धः । यथा नित्यः शब्दः कृतकत्वात् । अत्र हि नित्यत्वं साध्यं तद्विपर्य
येणाकृतकत्वं व्याप्तं । यत्कृतकं तदनित्यमेव । अतः साध्यविपर्ययव्याप्तत्वात्कृतकत्वं हेतुर्विरुद्धः । सा
ध्यसंशयहेतुरनैकान्तिकः । स चव्यभिचारश्चोच्यते स द्विविधः । साधारणानैकान्तिकः । स च व्यभिचार
श्चोच्यते स द्विविधः । साधारणानैकान्तिकोऽसाधारणानैकान्तिकश्चेति । तत्र प्रथमः पक्षसपक्षविपक्ष
वृत्तिः । यथा शब्दो नित्यः प्रमेयत्वादिति । अत्र प्रमेयत्वं हेतुः पक्षे शब्दे सपक्षे नित्ये विपक्षे चानित्ये घटादौ । व
र्तते यस्य प्रमेयत्वात् । तस्मात्प्रमेयत्वादिति हेतुः साधारणानैकान्तिकः । असाधारणानैकान्तिकः स उच्यते । राम॰
यः सपक्षविपक्षाभ्यां व्यावृत्तः पक्ष एव वर्तते । यथा भूर्नित्या गन्धवत्त्वादिति । अत्र हि गन्धवत्त्वहेतुः स च सपक्षा ३४

त्रिसाध्योमा विपक्षाद्व्यावृत्तानित्याज्जलादेर्व्यावृत्तं ।गंधवत्वस्य पृथिवीमात्रवृत्तित्वात् [illegible] ।व्यभिचारस्तु वस्तते ।सं
भवस्तु पक्षविपक्षस्पहेत्वोः सतः पक्षवृत्तित्वेततति विपक्षाद्व्यावृत्ति । [illegible] ःगमकत्वात् ।तस्मे तन्नियमाभा
वोव्यभिचारः ।स च द्वेधा संभवति ।सपक्षविपक्ष [illegible] गौत आवृत्तौ च ।पक्षस्य [illegible] परभूते हेत्वंतरमस्ति स प्रकरण
समः ।स सत्प्रतिपक्षः स एवोच्यत इति ।तद्यथा ।शब्दोऽनित्यः नित्यधर्मरहितत्वात् ।शब्दः नित्यः अनित्यधर्म
रहितत्वात् ।अत्र हि साध्यविपरीतोर्थसाधकं समानबलमनुमानांतरं प्रतिपक्ष इत्युच्यते ।यत्तु न तत्तुल्यब
लेनास्त्रतिपक्षः ।तथा हि विपरीतसाधकानुमानं त्रिविधं भवति ।उपजीव्यमनुपजीवकमनुभयं चेति ।तत्रा
घं बाधकं बलवत्वात् ।यथोऽत्र नित्यः परमाणुः मूर्त्तत्वात् ।घटवत् ।इत्यस्य पृथिवीत्वं नित्यवृत्तित्वरपटवृ
त्तित्वात् ।सन्नावदिति ।नित्यत्वमंतर्भाव्य परमाणुसाधकमनुपजीव्यं ।कथमेतदुपजीव्यमितिचेत् ।आत्मप्रत्र

र०भा० लाभादिति ब्रूमः। न च प्रमाणेनागृह्यमाणे धर्मिणि परमाणावाश्रयासिद्ध्यनित्यत्वा[illegible]मानादि[illegible]र्भवति। आश्रयासि
३५ द्धेः। अतोऽनेनानुमानेन परमाणुग्राहकस्य प्रामा[illegible]स्यानुज्ञानात्। अन्यथाऽस्योत्थानासंभवात्। तस्मादुपजी
व्यं बाधकमेव। उपजीवकं तु दुर्बलत्वाद्बाध्यं। यथेदमेवानित्यत्वानुमानं। तन्नीलं तु सत्प्रतिपक्षः। समबलत्वात्। य
स्य प्रत्यक्षादिप्रमाणेन पक्षे साध्याभावः। परिच्छिन्नः। स कालात्ययापदिष्टः। स एव बाधित[illegible]इत्युच्यते। यथा
अग्निरनुष्णः कृतकत्वाज्जलवत्। अत्र कृतकत्वं हेतुः तस्य पक्षोऽनुष्णत्वं तस्याभावः प्रत्यक्षेणैव परिच्छिन्नः
। त्वगिन्द्रियेणाग्नेरुष्णत्वपरिच्छेदात्। यथाऽपरोऽपि कालात्ययापदिष्टः। यथा घटस्य क्षणिकत्वे साध्ये प्रागुक्त
सत्वं हेतुः। तस्यापि यत्साध्यं क्षणिकत्वं तस्याभावः प्रत्यभिज्ञालक्षणप्रमाणपरिच्छिन्नः। स एवायं घटो यः पूर्व राम०
मुपलब्ध इति प्रत्यभिज्ञया पूर्वानुभवजनित[illegible]संस्कारसहकृतेन्द्रियप्रभवया पूर्वापरकालयोर्घटस्य स्थायित्वपरि ३५

छेद्यद्दिति। एते असिद्धादयः पंच हेत्वाभासाः। यथा [illegible]धर्म[illegible]दिरूपहीनत्वाद् दुष्ट[illegible]मानसाधयं
तीति। येपि लक्षणस्य व्यतिरेकिहेतोः त्रयोऽतिव्याप्त्यव्याप्त्यसंभवास्तेप्यत्रैवांतर्भवंतीति न तु पंचभ्योधिकाः।
तथाहि। अतिव्याप्तिर्व्याप्यत्वासिद्धः। विपक्षाद्व्यावृत्तेरभावात्। सोपाधिकत्वाद्वातिव्याप्तेः। यथा गोलक्ष
णाय कृतस्य गोलक्षणाय कृतस्य गोत्वसात्त। इमत्वं प्रयोजकं न तु पशुत्वं। तथाऽव्याप्तेर्भागासिद्धत्वं। यथा
गोलक्षणस्य शाबलेयत्वस्य। असंभवस्य स्वरूपासिद्धत्वं। यथा ब्राह्मणलक्षणस्य शुंडादंडवत्त्वस्य। ।
अभिप्रायांतरेण प्रयुक्तस्यार्थांतरं प्रकल्प्य दूषणाभिधानं छलं यथा नवकंबलोयं माणवक इति। वाक्यस्य
नूतनाभिप्रायेण प्रयुक्तस्यार्थांतरमाशंक्य कश्चिद्दूषयति। नास्य नव कंबलाः संभवंति। दरिद्रत्वात्। न
त्वद्द्वयमपि संभाव्यते। कुतोऽस्य नवेति। स च वादी छलवादीति पराजीयते। अर[illegible]न्तरं जातिः। साध्योत्कर्षसमा

न्या० दिभेदेन बहुविधा। विस्तरभयान्नेह कार्त्स्न्येन मोच्यते। तत्र व्याप्तेन दृष्टांतगतधर्मेण साध्येऽव्यापकधर्म
३६ स्याधानेनमुत्कर्षसमा जातिः। यथा शब्दो नित्यः कृतकत्वात् घटवत्। इत्युक्ते कश्चिदाह। यदि कृतक
त्वेन घटवत् शब्दोऽनित्यः स्यात्तेनैव हेतुना तद्वदेव शब्दः सावयवोपि स्यात्। अपकर्षसमस्तु गालिख्य
ते। दृष्टांतगतधर्मेण व्याप्तेनाव्यापकधर्माभावस्यापादनमपकर्षसमा जातिः। यथा पूर्वस्मिन्नेवानुमा
ने कश्चिदाह। यदि कृतकत्वेन हेतुना घटवच्छब्दो नित्यः स्यात्। पराजयहेतुर्निग्रहस्थानं॥ तच्च न्यूनाधि
कापसिद्धांतार्थांतरमतानुज्ञाविरोधादिभेदात् बहुविधमपि विस्तरभयान्नेह कार्त्स्न्येनोच्य
ते। तत्र विवक्षितार्थादन्यूनमेव न हीनं न्यूनो विवक्षितार्थात् किंचिदप्यधिकेन तदधिकं। अर्थांतरं। उत्त राम०
रापरिस्फूर्तिः प्रतिभा। पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनुज्ञा स्वीकारो मतानुज्ञा। ३६

ष्टांतार्थभंगो विरोधः॥इहात्यंतानुपयुक्तानां स्वरूपभेदेन भूयो भूयःप्र तिपादनमप्रयोजनानां वालह
तो हेषाम।एतावतैव वालव्युत्पत्तिसिद्धेः॥ ॥इति श्रीकेशवमिश्रविरचिता तर्कभाषा समाप्ता॥
॥ ॥शुभमस्तु॥ ॥०॥ ॥०॥ ॥श्री॥ ॥०॥ ०॥ ॥०॥ ॥ ॥

राप०
३७

ग्रंथसंख्या तिनकी गाथा ७५०

Sri Sharada Peetham, Sringeri
MANUSCRIPT PRESERVATION CENTRE

A/C. NO.	NEW	3217	OLD	196
FOLIO	080			

TITLE

1. अन्वयचिन्तामणिव्याख्या
2. [illegible]
3. [illegible]